संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (II) -13
In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविना प्रणीता

॥ रघुनाथविजयचम्पूः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्यः के. नीलकण्ठम्
निदेशकः, संस्कृतपरिषद्

सम्पादिका
डा. के वरलक्ष्मीः
उपनिदेशिका, संस्कृतपरिषद्

सहायकः
जोशी. भरद्वाजः

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain, Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) -13

श्रीकृष्णकविना प्रणीता

॥ रघुनाथविजयचम्पूः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठम्

निदेशकः, संस्कृतपरिषद्

सम्पादिका

डा. के वरलक्ष्मीः

उपनिदेशिका, संस्कृतपरिषद्

सहायकः

जोशी. भरद्वाजः

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 13

Raghunāthavijayacampūḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Raghunāthavijayacampūḥ
ISBN – 978-93-80171-68-5

© Sanskrit Academy

Year	:	2023
Pages	:	xliv+43
Copies	:	300
Price	:	Rs 200

Sanskrit Academy Ṣaṣṭyabda Granthamālā (II)-13
In Public domain. Digitization: Muthulakshmi Research Academy

Raghunāthavijayacampūḥ

of

Sri Krishna Kavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor

Prof. K. Neelakantham

Director, Sanskrit Academy

Editor

Dr. K Varalakshmi

Dy. Director, Sanskrit Academy

Assistant

Joshi Bharadwaj

Associate Editor & Project Investigator

K V Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University Campus,

Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 13

Raghunāthavijayacampūḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Raghunāthavijayacampūḥ
ISBN – 978-93-80171-68-5

© Sanskrit Academy

Year	:	2023
Pages	:	xliv+43
Copies	:	300
Price	:	Rs 200

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

'A narrative in mixed prose and verse has been called Champu' is the definition given by rhetoricians of Sanskrit. And "this variety of composition enlarges the scope and ease of the poet's expression and entertains the reader by the presentation of combinative of varying melodies" said by Bhojaraja in ChampuRamayana (गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः). And composer of many Champukavyas Sri Melpattur NarayanaBhattatiri also reiterated that गद्यावली पद्यपरम्परा च प्रत्येकमेवावहति प्रमोदम्। हर्षप्रकर्षं तनुते मिलित्वा. Many prose passages have been seen in the midst of the verses in the Puranas, but there is not any instance of classical poetry of this recognized class known earlier. The rhetoricians of Sanskrit literature from Bhamaha of 6th century A. D. have given the definition to ChampuKavya. Hence it is thought that Kavyas in the form Champu must have been composed even before the 6th A.D. "But the earliest works of such class are found only after the 10th century A.D. And then on wards Champus became very popular and particularly they were composed largely in South India" said by M. Krishnamachariar, Sri Baladev Upadhyaya, Prof. M. Gopal reddy and other authors of history of Classical Sanskrit Literature. According to these,

In Public domain. Digitization Muthulakshmi Research Academy

257 ChampuKavyas have been traced out till now and some of them were published from various institutes and especially most of the ChampuKavyas were written by the poets belonged to Telangana, Andhra Pradesh, Tamilnadu, Karnataka and Kerala.

Yashastilakachampu of Somadeva / Somaprabhasuri, *Yuddhakanda* of Bhoja's *ChampuRamayana* composed by Laksmanasuri, *Sreenivasavilasa champu* of Krishnakavi, *Bhadrachalachampu* of Raghavarya, *Rameshwara vijayachampu* of Brahmatantraparakalaswamy are some of the famous champukavyas belong to Telangana.

We have recently published ***Ramakrishnayudhisthiracharitachampu*** of Sriman Perumalla Venkatarajakavi, ***Jagannatha Champu*** of Jagannathaarya, ***Yudhishthiraashwamadha Champu*** of Venkata shastry, ***Sri VenkateshaChampuPrabandha*** of **Sriman Shirisinahal Perumandlacharya**. And now we are very happy to bring out another beautiful *ChampuKavya* ***Raghunathavijaya Champu*** authored by scholarly poet of Telanagana State of Sri Krishna Kavi. This book was published long ago in Telugu script from Sri Saraswati Mudranaalaya, Chennai.

According to the History this Krishnakavi, he is said to have been lived between 1830 - 1919, and composed 100 above books on various Shastras, Kavyas, stotras. He took sannyasaasrama on the

advice of his gurus and became famous as Srimatparamahamsa Parivrajakacharya Sri Krishna Brahmateertha Yateendra. He composed this Champukavya on the Travelogue of Sri Raghunatha Vinchurkar who was the ruler of Vinchurkar dynasty of Maharashtra. He was born in 1824 and died in 1882. Raghunatha was a great scholar and an admirer of poets. He was brave ruler and at the same he was so kind towards needy. He was incomparable social reformer. On the advice of him Krishnakavi had composed this Champu Kavya in beautiful Sanskrit. The life history of Krishnakavi and King Raghunatha are given full in detail in the foreword in Sanskrit.

I appreciate the honest efforts Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Krishnakavi and king Raghunatha of this रघुनाथविजयचम्पू and prepared a very comprehensive foreword that could be useful for further research on the contributions of Samsthanas in Telangana. She has published a book सुरपुरसंक्षिप्तराजकीयेतिहासः in Sanskrit from our academy. I congratulate Dr K. Varalaksmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank another amicable deputy director Dr V. Subrahmanyam for his continuous help in the publication of Academy and congratulations to Sri K. V. Suryaprakash senior research assistant and in charge of project of reprinting of rare books. My thanks to Dr Joshi Santosh Kumar research

In Public domain. Digitization Muthulakshmi Research Academy

assistant in the academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Ranjit Kumar Barman Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Gayatri Muralikrishna Director, Aadharsh Institutions in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः
Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

कृष्णकविविरचितः
रघुनाथविजयचम्पूप्रबन्धः
(विविधतीर्थसार्थयात्राप्रबन्धः Travelogue)

रघुनाथविजयचम्पूप्रबन्धकारस्य कृष्णकवेः तन्नायकस्य रघुनाथविञ्चूरकरस्य च जीवनविशेषाः अन्तरङ्गैः बहिरङ्गैश्च प्रमाणैः प्रस्तूयन्ते येन भारतस्य भव्यमितिहासं सनातनसंस्कृतिं सम्प्रदायांश्च ज्ञातुं प्रभवामो वयं भारतीयाः। रघुनाथविजय-श्रीनिवासविलासचम्पूप्रबन्धयोः कृतिकारः कृष्णकविरेव इत्यतः रघुनाथविजयचम्पूप्रबन्धात् श्रीनिवासविलासचम्पू प्रबन्धाच्च कृतिकारजीवनविशेषाणां अन्तरङ्गप्रमाणानि सङ्गृहीतानि।

'गोलकोण्डकवुलसञ्चिका' इति ग्रन्थे सुरवरं प्रतापरेड्डिमहाभागः नैकेषां विद्वत्कवीनां परिचयपूर्वकं वर्णनं चकार। तस्मात् ग्रन्थात् बहिरङ्ग प्रमाणानि च सङ्गृहीतानि।

रघुनाथविजयचम्पूप्रबन्धनायकस्य रघुनाथस्य पालितपुत्रः शिवदेवरावविञ्चूरकरः 'A Brief Story of Vinchoorkar Family' इति ग्रन्थं क्रि.श. 1909 तमे वर्षे लिलेख। अस्य ग्रन्थस्याधारेण रघुनाथविजयचम्पूप्रबन्धनायकस्य रघुनाथ-विञ्चूरकरस्य जीवनविशेषाणां बहिरङ्गप्रमाणानि प्रस्तूयन्ते। रघुनाथविजयचम्पूप्रबन्धादेव अन्तरङ्गप्रमाणानि सङ्गृह्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

Dr. S. Krishnamurthy and Vilas Wahane 'Inscriptions from Sri Lakshmi Narasimha temple at Nira Narasimhapur – Maharashtra- A study'[1] इत्यस्मात् शोधलेखस्थशिलालेखविवरणात् कवेः नायकस्य च जीवनविशेषाणां बहिरङ्गप्रमाणानि प्रस्तूयन्ते।

तूमाटिदोणप्पविरचितः आन्ध्रसंस्थानमुलु – साहित्यपोषणम् इति तेलुगुभाषाविरचित-ग्रन्थादपि कवेः कविकृतीनाञ्च प्रमाणानि सङ्गृह्यन्ते।

कृष्णकवेः जीवनकाव्यम्

रघुनाथविजयचम्पूप्रबन्धकर्ता कृष्णकविः वनपर्त्तिसंस्थाने धर्माधिकारी आसीत्। गृहस्थाश्रमे होसदुर्गं कृष्णमाचार्यः इति प्रथितोऽयं कविः अनन्तरं सन्न्यस्य श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकाल यतीन्द्रमहादेशिक इति विश्रुत अभूत्। परश्शतग्रन्थकर्ताऽयं कृष्णकविः रघुनाथविजयचम्पूप्रबन्धे श्रीनिवासविलासचम्पूप्रबन्धे च स्ववंशचरित्रमधिकृत्य नैकविशेषान् उल्लिलेख।

होसदुर्गं कृष्णमाचार्यः - नवदुर्गकृष्णकविः

रघुनाथविजयचम्पू-श्रीनिवासविलासचम्पूप्रबन्धयोः कर्त्ता होसदुर्गं कृष्णमाचार्यः इति साहित्यग्रन्थेषु बहुधा दरीदृश्यते।

---

[1] Arnava Vol X NO.2 Half yearly Year 2021, Pg. 67-84

In Public domain. Digitization Muthulakshmi Research Academy

प्रबन्धद्वये तु नवदुर्गकृष्णकविः नव्यदुर्गनिलयः प्रत्यग्रदुर्गस्थितिः नवदुर्गस्थः इति कृष्णकविः स्वपरिचयं प्रस्तौति।

श्रीमत्प्रत्यग्रदुर्गस्थितिरिह तनुते सम्मतं सन्मतीनां

नव्यं काव्यं सुभव्यं मितमतिललितं कृष्णनामा कवीन्द्रः[2]।।

श्रीनव्यदुर्गनिलयः कृष्णः कविसार्वभौमविरुदाढ्यः[3]।

श्रीमन्नवदुर्गस्थः कृष्णकविः सार्वभौमबिरुदाढ्यः[4]।

आहूतः श्रीशैलताताभिधकृतितनुजो **नूत्नदुर्गात्तवासः**[5]।

नवदुर्गकृष्णकविना जवेन रघुनाथविजयेस्मिन्[6]।

श्रीप्रत्यग्रदुर्ग-कविसार्वभौम-कविगण्डभेरुण्डबिरुदाङ्कितकृष्णार्येण कारितःश्रीनिवासविलासाख्यश्चम्पूप्रबन्धः[7].....

प्रत्यग्रदुर्गपुरकृतावसतिना तेन श्रीकृष्णकविना निर्मीयते .... श्रीनिवास-विलासाख्यः ...चम्पूप्रबन्धः[8]।

---

[2] र.वि.च. 1. 7

[3] र.वि. च.1. 34

[4] र.वि. च.2.20

[5] र.वि. च.5.23

[6] र.वि. च. 5. 3

[7] श्री.वि.1.पृ.सं.01

[8] श्री.वि.1.पृ.सं. 05

In Public domain. Digitization Muthulakshmi Research Academy

इति **श्रीनवीनदुर्गनिलयस्य** कृष्णकविसार्वभौमस्य[9].... **श्रीमच्छ्रीशैलघनगिरिप्रत्यग्रदुर्ग**......श्रीकृष्णकविसार्वभौमस्य[10]...... .. होसदुर्गम् इत्यस्मिन् पदप्रयोगे 'होस' इति कन्नडभाषागतं पदमस्ति। 'होस' इति कन्नडपदस्य अर्थः **नव** इति भवति। कृष्णकविना होसदुर्गम् इति पदस्य संस्कृतीकरणं विहितमिति अनुमीयते। 'होस' इति पदस्य स्थाने नवनव्यनवीननवदुर्गपुरप्रत्यग्रादीनि पदानि कविना प्रयुक्तानि। नवदुर्गपुरे (होसदुर्गपुरे) कृष्णकविवंशजाः निवासं चकारेति ज्ञायते।

होसदुर्गः (नवदुर्गः)

आन्ध्रसंस्थानमुलु – साहित्यपोषणम् इति ग्रन्थे आनेङ्गुदिसंस्थानस्य वर्णनसन्दर्भे होसदुर्गस्य वर्णनम् उपलभ्यते। निजामराष्ट्रस्य नैरृतिदिशि तुङ्गभद्रानद्याः उत्तरतीरे विद्यमाने होसपेटतालुकायां कमलापुरसमीपे आनेगोन्दिनामकः ग्रामः अस्ति। आने इति कन्नडभाषापदमस्ति। तस्य अर्थः गजः इति अस्ति। गोन्दि इत्युक्ते कुपथः इत्यर्थः। गजाकृत्या साम्यं भजतः पर्वतत्रयसङ्गमे अस्तीत्यतः आनेगोन्दीति नामकरणं कृतम्। सम्प्रति मैसुरुराज्यस्थे रायचूरुमण्डलान्तर्गतोऽस्ति अयं ग्रामः।

---

[9] श्री.वि.च.3

[10] श्री.वि.च.5

क्रि.श. 14 शताब्देः पूर्वार्धे बल्लारिमण्डलस्य शासकः कम्पिलिदेवरायलाभिधः राजा आनेङ्गुदिप्रदेशे शत्रुजनदुर्गमं 'होसमले' इति दुर्गं निर्मितवानिति ज्ञायते। अधुना एषः दुर्गः आनेगोन्दिदुर्गः इत्येव व्यवह्रियते। होस इति कन्नडपदस्य नव इत्यर्थः। होसदुर्गम् इति निवासस्थानस्याधारेण कृष्णकविवंशः प्रथित इति तर्कयितुं शक्नुमः। श्रीनिवासविलासचम्पूप्रबन्धस्यान्ते आनेङ्गुन्दिप्रस्तावः कविना कृतः। अतः कविवंशः आनेङ्गुन्दिस्थनवदुर्ग(होसदुर्ग) सम्बद्धः इति निष्कर्षः प्राप्यते।

आनेङ्गुन्दिक्षितीन्द्रात्तिरुमलनृपतेः प्राप्तसन्मानवृत्तिः[11]।

जीवनकालः

'गोलकोण्डकवुलसञ्चिका' इति ग्रन्थे सुरवरं प्रतापरेड्डिमहाभागः प्रस्तावनायां 12-12-1934 इति दिनाङ्कादि विवरणं प्रादात्। कविपरिच्चयसन्दर्भे श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकाल-यतीन्द्रमहादेशिक इति अपरनामाभिधः कृष्णकविः 15 वर्षेभ्यः पूर्वं परमपदमलञ्चकार इति उल्लेखितवान्। अनेन वर्णनेन कविः क्रि.श. 1919 तमे वर्षे परमपदमलञ्चकार इति अनुमीयते। अस्य अनुजस्य वेदान्ताचार्यस्य जननम् शा.श. 1764 संवत्सरे (ख्रिस्ताब्दः

---

[11] श्री.वि.च. 5. 22

In Public domain. Digitization Muthulakshmi Research Academy

1842) शुभकृत्संवत्सरे माघमासे शु. 5 अभवत्। नवतिवर्षदेशीय आसीदिति। भावसंवत्सरे श्रावणमासे 3 (तृतीयायां) परमपदम् अलञ्चकार। (अयं क्रि.श. 1932 तमे वर्षे परमपदम् अलञ्चकार इति ज्ञायते।) अनेन प्रमाणेनापि कृष्णकवेः जननकालः 1830 खिस्ताब्देः अनन्तरमेवेति वक्तुं शक्यते।

वंशाचरितम्

श्रीशैलकुलतिलकः शठमर्षणकुलतिलकः कृष्णकविः

श्रीशैलवंशास्य तिलकः शठमर्षणकुलस्य तिलक इति कृष्णकविः स्वपरिचयं चकार। शठमर्षणगोत्रे लब्धजन्माऽयमिति हेतोः शठमर्षणकुलतिलक इति आत्मानं वर्णयति कविः।

श्रीशैलवंशतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः[12]।
शठमर्षणकुलतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः[13]।

इति श्रीशैलकुलतिलकवेङ्कटार्यवर्यपौत्र-नवीनदुर्गपुरस्थित-तातार्यवर्य-विद्वच्चूडामणि-द्वितीयतनूभुवः-कृष्णकविसार्वभौमस्य कृतिषु रघुनाथविजयाख्य-चम्पूप्रबन्धः समाप्तः[14]।

---

[12] र.वि. च.3.35

[13] श्री.वि.च.2

[14] र.वि.च. 5

In Public domain. Digitization Muthulakshmi Research Academy

श्रीशैलवंशपम्परा - विद्वत्परम्परा

श्रीनिवासविलासचम्पूप्रबन्धान्तेऽपि कृष्णकविः स्ववंशमहत्त्वं कीर्तयामास। अत्र कृष्णकविवंशपरम्परा तत्कालीनविद्वत्परम्परा च विशदीभवति।

1 पितामहः – वेङ्कटार्यः

2 मातामहः – श्रीमदुक्कल श्रीवत्सकुल रामार्यः

मातामही – अनन्ताम्बा

4 तातार्यः – पिता कृष्णाम्बा – माता

5 वेङ्कटाचार्यः – अग्रजः

6 कृष्णार्यः – द्वितीयपुत्रः रचयिता

7 वेदान्ताचार्यः अनुजः

8 होसदुर्गं श्रीनिवासराघवाचार्यः पुत्रः –

न्यायव्याकरणवेदान्तज्यौतिषवैद्यशास्त्रज्ञः

9 मातुलः – रङ्गनाथः

10 *श्रीरङ्गार्यः नृसिंहः – (तातगुरु)?

11 *श्रीश्रीनिवासकृतितिलकः (मातृष्वसेयः)

प्यापलीग्रामदीव्यद्रङ्गाम्बा-बोज्जिकृष्ण-उत्तमकृतितनुजः –

यस्य – मातृष्वसेयः ?

12 *रङ्गाम्बा (कृष्णाम्बायाः स्वसा – कृष्णार्यस्य मातृष्वसा –

तस्याः पतिः बोज्जिकृष्णः प्यापलीग्रामवासिनौ)

13 *व्याकरणगुरुः - श्रीशैलात्रिककुलतिलकश्रीकोण्डमार्यः

(अधिगतशब्दनयः)

In Public domain. Digitization Muthulakshmi Research Academy

14 ***लक्ष्मणार्यः (त्रातश्रीलक्ष्मणार्यानघमत विभवैस्तत्त्व मार्ताण्डमुख्यग्रन्थैः)**

15 श्रीबुक्कपुरी श्रीश्रीनिवासार्यस्य नप्तुः श्रीरङ्गनाथाभिध कृतितिलकात् उदीतः।

16 बुच्चि श्रीवेङ्कटार्यः सुरपुरबहिरीवेङ्कटेन्द्रस्य आचार्यः पुराणं दीक्षिताचार्यः – **गद्वालास्थानकविः**

श्रीवासब्रह्मतन्त्रादिमपदपरकालार्यवर्यानघाङ्घ्रि

द्वन्द्वाब्जानुग्रहात्तप्रतिपदविविधग्रन्थनिर्माणशक्तिः।

सद्भावान् **कृष्णनामा सरसकविघटासार्वभौमो** व्यतानी-

च्छ्रीमत्प्रत्यग्रदुर्गस्थितिरतिललितं सर्वभव्यं सुकाव्यम्।।

श्रीमत्सवायिराजाबहद्दरुबहिरीत्यादिचिह्नाङ्कितस्य

श्रीसीतारामभूमीपतिमकुटमणेर्मुक्कराख्यान्वयेन्दोः।

सभ्यास्सर्वे समेतास्समदगजमिहारोप्य सञ्चार्य वीथ्यां

हर्षाद्यं तूर्यघोषैस्समदकविघटाघण्डभेरुण्डमाख्यन्[15] (म)।।

इति **श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुवर**करुणाकटाक्षसमासादित निरवद्यकविता-प्रतिभाभासुरस्य श्रीमच्छ्रीशैलघनगिरिप्रत्यग्रदुर्ग **तातार्यवर्यद्वैतीयीकनन्दनस्य** साहितीज्यौतिष-**पारदृश्ववेङ्कटाचार्य वर्यानुजन्मनश्श्रीमदुक्कलश्रीवत्सवंशरामार्यानन्ताम्बादौहित्रस्य श्रीकृष्णकवि-सार्वभौमस्य** एतद्ग्रन्थनिशामनावसरात्मकूरुपुराधिप

---

[15] श्री.वि.च.5. 118,119

In Public domain. Digitization Muthulakshmi Research Academy

सीतारामभूपालास्थानकविव्रजप्रदत्तसमद-कविघटागण्डभेरुण्ड बिरुदस्य कृतिषु श्रीनिवासविलासाख्यश्चम्पूप्रबन्धो **दशमः** श्रीश्रीनिवासपरब्रह्मणे नमः[16]।

कृष्णकविसोदरः होसदुर्गं वेदान्ताचार्यः

एतस्य जीवनचरितविशेषाः 'गोलकोण्डकवुलसञ्चिका' इति ग्रन्थे उपलभ्यन्ते। जन्मस्थानं महबूबनगरजिल्लास्थं वनपर्त्तिसंस्थानम्। गद्वालसंस्थानस्य धर्माधिकारी। जननम् शा.श. 1764 संवत्सरे (ख्रिस्ताब्दः 1842) शुभकृत्संवत्सरे माघमासे शु. 5 नवतिवर्षदेशीय आसीदिति। भावसंवत्सरे श्रावणमासे 3 (तृतीयायां) परमपदम् अलञ्चकार। (अयं क्रि.श. 1932 तमे वर्षे परमपदम् अलञ्चकार इति ज्ञायते।) रचनाः **श्रीकृष्णब्रह्मतन्त्रार्य वेदपादस्तवः** मुद्रितः, **आचार्यवैभवादुलु** अमुद्रिता रचना। अनेन अनुमीयते यत् कृष्णकवेः जननं शा.श. 1764 संवत्सरात् प्राग् जातम्।

कृष्णकविपुत्रः होसदुर्गं श्रीनिवासराघवाचार्यः

कृष्णकविकृतिषु अस्य उल्लेखो नास्ति। संस्कृतसाहित्यचरित्रसम्बद्धग्रन्थेषु कृष्णकविपुत्रोल्लेखः दृश्यते। तदनुसारं कृष्णकविपुत्रविवरणमत्र प्रस्तूयते। अस्य जन्मस्थानं

---

[16] श्री.च5.120, 121, 122, 123, 124 , 125

In Public domain. Digitization Muthulakshmi Research Academy

महबूबनगरस्थवनपर्तिसंस्थानम्। प्रजोत्पत्तिकार्तिकबहुळं। षष्ठितमे वयसि दिवङ्गतः। **वीरराघवीयभूमिका आचार्यवैभवम् स्वभावपद्धतिश्च** अस्य रचनाः।

विद्यागुरुः – आध्यात्मिकगुरुः

श्रीमच्छ्रीसज्जयार्यः स्वविद्यागुरुरिति कविरुल्लिलेख। श्रीमत्परकाल गुरुः आध्यात्मिकगुरुरिति ज्ञायते। **श्रीमत्परकाल गुरुविजयः** इति प्रबन्धोऽपि कविना रचितः।

श्रीमच्छ्रीसज्जयार्याभिधगुरुणा प्राप्तविद्याविलासः[17]।

श्रीमत्परकालगुरुविजयाद्यनेकप्रबन्धरचनधुरन्धरेण....कृष्णार्येण कारितः श्रीनिवासविलासचम्पूः[18]।

समकालिककविपण्डिताः

तिरुमलश्रीबुक्कपुरी श्रीश्रीनिवासार्यः

कविरयं सुरपुरसंस्थानस्थः आसीत्। कालः शालिवाहनशकः 1730 (1808 खिस्ताब्दः) 24000 श्लोकात्मकः तत्त्वमार्ताण्डः, नयद्युमणिः, गुणमीमांसा, सिद्धान्तचिन्तामणिः, उपसंहारविजयपराजयः, ज्ञानरत्नप्रकाशिका, चतुस्सूत्री, त्रय्यन्त घण्टाथः, दुरुपदेशधिक्कारः, रहस्यत्रयसारगाथाव्याख्या, दत्तरत्न

---

[17] श्री.वि. 5.22

[18] श्री.वि.च.1

प्रदीपिका, ग्रहणभुक्तिदीपिका, श्रीजयन्तीनिर्णयश्च अस्य रचनाः। कृष्णकविः श्रीनिवासार्यस्य तत्त्वमार्ताण्डस्य उल्लेखमकोरत्।

श्रीनिवासार्यस्य नप्ता किरीटि बुच्चि श्रीवेङ्कटार्यः सुरुपुरास्थानकविः

खिस्ताब्दः 1830 कवेः कालः। सुरपुरसंस्थानास्थान कविः। महान् विद्वान्। काश्यादिप्रसिद्धस्थानेषु शास्त्रवादे विजेता। द्वैताद्वैतमतरूपपादुके स्वमतस्थापनपरमत खण्डनरूपचामरे विशिष्टाद्वैतरूपकीरीटञ्च दधारेति कविः किरीटिरिति बिरुदाञ्चितः। 37 तमे वत्सरे अयं कविपण्डितः परमपदमलञ्चकार। अहोबिल पीठाधीशमपि शास्त्रार्थै पराजितवान्। गदाधरीयखण्डनम् (झञ्झा मारुतम्), श्रृङ्गारतरङ्गिणी, अलङ्कारकौस्तुभः, रसिकमानसोल्लास भाणः, शुकाभिपतनम्, उषापरिणयनाटकम्, यतिराज दण्डकम्, हयग्रीवदण्डकम्, दशावतारस्तोत्रम्, भावशतकम्, अचलात्मजा परिणयः, गजसूत्रवादः, श्रृङ्गारलहरी च अस्य रचनाः।

पुराणं दीक्षिताचार्यः गद्वालास्थानकविः

श्रीनिवासविलसचम्पूप्रबन्धान्ते कृष्णकविः पुराणं दीक्षिताचार्यं प्रशशंस। गद्वालसंस्थानस्थ पुल्लगुम्मिग्रामवासी अयं कविः 1894 खिस्ताब्दिपर्यन्तं जीवितवानिति ज्ञायते। जननम् शा.श 1744 (खिस्ताब्दः 1822) मरणम् शा.श. 1791 (खिस्ताब्दः 1869) अस्य कवेः रामचम्पूः, छन्दोमुकुरः इति संस्कृतरचनाद्वयं, रामनृपकरणपूरणम्, केशवसुप्रभातम्

 In Public domain. Digitization Muthulakshmi Research Academy

काव्योत्कर्षः इति अमुद्रितरचनात्रयञ्च स्तः। गद्वालसंस्थानप्रभोः रामभूपालस्य विद्यागुरुः। साहित्यविद्वन्मणिबिरुदाञ्चितः[19]। किरीटि वेङ्कटाचार्यस्य पुराणं दीक्षिताचार्यस्य प्रशंसापात्रतां गतः मदीयः श्रीनिवासविलासचम्पूप्रबन्धः इति कृष्णकविः स्वप्रबन्धस्य महत्त्वं प्रकटीचकार।

संस्थानानि – सम्माननानि-

आनेङ्गुदिपालकस्य तिरुमलनृपतेः वनपर्तिसंस्थानस्य रामेश्वरनृपतेः आत्मकूरुसंस्थानस्य मुक्करवंशभूपालस्य श्रीसीतारामस्य आस्थाने प्राप्तसन्मानवृत्तिरिति स्वयं कविः उल्लिखितवान्। रघुनाथविजय प्रबन्धरचनापरिशीलनेन ज्ञायते यत् कृष्णकविः महाराष्ट्रस्थ विञ्चूरपुरपालकानामपि सत्कारं प्राप्नोत्[20]।

बिरुदानि

विद्वत्कविः कवीन्द्रः कविसार्वभौमः समदकविघटागण्डभेरुण्डः इति बिरुदाञ्चितः कृष्णकविः। श्रीनिवासविलासचम्पूप्रबन्धस्य निशमनावसरे आत्मकूरु पूराधिपस्य सीतारामभूपालस्य आस्थानकविगणेन समदकविघटा

---

[19] श्री. वि च 127, 128, 130

[20] र वि च 20-25

गण्डभेरुण्डबिरुदः प्रदत्तः। बिरुदप्रदानात्पूर्वं गजारोहणेनापि कविः सत्कृतः इति वर्णितम्[21]।

परश्शतग्रन्थकर्त्ता – नवदुर्गं कृष्णकविः

गोलकोण्डकवुलसञ्चिकानुसारं कृष्णकवेः मुद्रितामुद्रितग्रन्थानां विवरणं प्रस्तूयते। श्रीपरकालविजयः, उत्तरपरकालगुरुविजयः, रामेश्वरविजयः, रघुनाथविजयः, श्रीनिवासविलासः, रङ्गराजविलासः, नृसिंहविलासः, कार्तिकोत्सव दीपिका, केशवोत्सवमालिका, श्रीलक्ष्मीसहस्रम्, रसास्वादिनी, आचार्यवेदपादस्तवव्याख्यानम्, नवरत्नहारस्तव व्याख्यानम्, काव्योत्कर्षरक्षा, सरस्वतीमूलधनम्, श्रीकृष्णजयन्तीपौर्वापर्य निर्णयः, शिष्टसिद्धान्तपद्धतिः, शूद्राशीर्निर्णयः, कर्तृक्रमनिर्णयः, स्वयंव्यक्तप्रतिष्ठानिर्णयः, अधिकमासोत्सवनिर्णयः, सोदरकन्याद्वय विवाहनिर्णयः, अतिक्रान्तश्राद्धकालनिर्णयः, विवाहकालनिर्णयः, प्रसन्नाभरणम्, अलङ्कारमणिहारः, वृत्तिमुक्ताहारस्तुति व्याख्यानम्, विजयदशमीनिर्णयः, नूतनोपाकर्मनिर्णयः, सुभद्रापरिणयः विक्रान्त राघवम्, उन्मत्तपाण्डवञ्च।

स्तोत्राणि – प्रसन्नान्दस्तवः, प्रसन्नामृतस्तवः, श्रीरामवेदपादस्तवः, श्रीनिवासवेदपादस्तवः, देशिकेन्द्रवेदपादस्तवः, आचार्यवेदपाद

---

[21] र.वि. 5. 23,24

 In Public domain. Digitization Muthulakshmi Research Academy

स्तवः, नवरत्नहारस्तवः, चपेटाहतिस्तुतिः, श्रीरामसुप्रभातम्, श्रीहयग्रीवसुप्रभातम्, श्रीगोपालसुप्रभातम्, श्रीरङ्गनाथसुप्रभातम्, सूर्यदण्डकम्, आचार्यगद्यम्, वेदान्तदेशिकसुप्रभातम्, श्रीहयग्रीव पञ्चरत्नस्तवः, श्रीलक्ष्मीपञ्चरत्नस्तवः, श्रीनारायणाष्टकम्, श्रीसम्पत्कुमाराष्टकम्, श्रीरामाष्टकम्, पञ्चायुधस्तोत्रम्, श्रीनावास नवरत्नमाला, लक्ष्मीनवरत्नमाला, अलङ्करणमालिका, कावेरीलहरी स्तुतिः प्रसन्नसौभाग्यम् वृत्तमुक्ताहारस्तुतिः नेत्रोल्लासः धर्मानुशासनम् आळवन्दारस्तोत्रम् जितं ते स्तोत्रम् चामराजेन्द्राशीर्नवरत्नमालिका ।

विभिन्नग्रन्थाः

आह्निकरत्नम्, श्रीमद्भागवतसप्ताहाह्वानपत्रिका, नव्योपाकर्मनिर्णयः, मेघमाला, समयामृतम्, सूर्योपरागदर्पणः, राजवंशरत्नावलिः, कल्याणगीतमञ्जरी, उत्तररङ्गमहात्म्यम्, मदनगोपालमाहात्म्यम्, श्रीरामायणवैभवम्, आराधनक्रमः, स्वस्तिवाचनम्, श्रीपरकाल-श्रीमठशिलाशासनश्लोकावलिः, उत्तररङ्गनाथाध्ययनोत्सवमण्डप-शिलाशासनम्, उत्तररङ्गनाथमहाद्वारगोपुरशिलाशासनश्लोकावलिः, शङ्कराम्बासमुद्रशिलाशासनश्लोकावलिः, शम्भुरहस्यम्, श्रीनिवास-सुप्रभातम्, ऐकोद्दिष्टघन्नभोक्तृप्रायश्चित्तादिनिर्णयः, श्रीशरदम्बुज माला, श्रीसर्वर्तुकुसुममाला, श्रीरामचन्द्रमङ्गलमालिका

श्रीदशावतारस्तुतिः, श्रीमज्जार्जिचक्रवर्त्याशीर्मालिका तिरुपति वेङ्कटेश्वरगोविन्दनामानि च।

रघुनाथविजयचम्पूप्रबन्धः - रचनाकालः

रघुनाथविञ्चूरकरः तीर्थयात्रातः क्रोधनवत्सरविजयदशम्यां (1865 C.E.) तपश्चर्यानियमः समापितवान् इति उल्लिखति कविः। रघुनाथविजयचम्पूप्रबन्धं रघुनाथनृपतेः प्रार्थनया एकस्मिन् दिवसे एव व्यरचयदिति कृष्णकविः काव्यान्ते स्वयमुल्लिखति। रचनाकालमपि निर्दिशति।

रघुनाथविजयमेनं व्यतनोद्दिनमेकमेव कृष्णाख्यः।।

गिरिकरिगिरिविधुसम्मितिभाजि श्रीशालिवाहनस्य शके।।

क्रोधनम(व)र्षाश्विनसितदशमे रघुनाथविजय एष कृतः[22]।

विञ्चूरकरवंशाचरिते ख्रिस्ताब्दे 1851 रघुनाथः प्रथमतीर्थयात्रातः प्रतिनिवृत्तः इति उल्लिखितः। द्वितीयतीर्थयात्रा 1865 ख्रिस्ताब्दे सम्पन्नः। कवेः उल्लेखानुसारं रघुनाथः क्रोधनवत्सरविजयदशम्यां तीर्थयात्रां समापितवान्। स च शालिवाहनशकः 1787 अपिच 1865 ख्रिस्ताब्दः। अतः द्वितीयतीर्थयात्रा एव रघुनाथविजय चम्पूप्रबन्धस्य कथावस्तु इति निष्कर्षः। नीरानरसिंहक्षेत्रस्थ

---

[22] र.वि.5. 24, 25

 In Public domain. Digitization Muthulakshmi Research Academy

शिलालेखानुसारं रघुनाथः जीर्णदेवालयस्योद्धारं 1787 शालिवाहनशके कार्तिकबुहलपञ्चम्यां (1865 CE) विहितवान्.

कविवाक्यम्

यत्कविना कर्तव्यं तदिह त्वत्कीर्तिभूषणं रचितम्।
रघुनाथविभो कविवरविभूषणं तु त्वदायत्तम्। र.वि.5 26

प्रबन्धस्वरूपम्

कृष्णकविः स्वप्रबन्धस्य स्वरूपं काव्यान्ते वर्णयतीत्थम् –

प्रथमविलासः – 34 श्लोकाः 1 गद्यम्
द्वितीयविलासः – 19 श्लोकाः गद्यत्रितयम्
तृतीयविलासः – 34 श्लोकाः गद्यचतुष्कम्
चतुर्थविलासः – 29 श्लोकाः गद्यद्वयम्
पञ्चमविलासः – 26 श्लोकाः गद्यत्रितयम्[23]

कथावस्तु - विविधतीर्थसार्थयात्रा

रघुनाथः इति नृपतिः विञ्चूरपुरं शास्ति स्म। तस्य जीवनकालः खिस्ताब्दे 1824-1882 इति ज्ञायते। रघुनाथः स्वजीवनकाले द्विः पुण्यक्षेत्रसन्दर्शनं चकार इति तत्पालितपुत्रः शिवदेवरावविञ्चूरकरः A Brief Story of Vinchoorkar Family इति ग्रन्थे वर्णयति । तीर्थयात्रावर्णनपरकः रघुनाथ जीवनस्य एकः

---

23 पञ्चमे विलासस्य उपसंहारे कविना स्पष्टीकृतम्।

पक्षः अस्य काव्यस्य कथावस्तु इति वक्तुं शक्यते। विविधतीर्थं सार्थयात्रावर्णनं करोमीति कृष्णकविः काव्ये कथावस्तु निर्दिशति।

विञ्चूरपुरम्

विञ्चूरपुरं महाराष्ट्रस्थनासिकजनपदेऽन्तर्भवति। विञ्चूरपुरमधिष्ठाय विञ्चूरकरवंशजाः शासनं चक्रुः। एते वीराः मराठापेष्वाकाले विश्रुताः । विञ्चूरवाडाप्रासादः अतीव ऐतिहासिकप्रसिद्धोऽसीत्।

पञ्चवटीनिकटे भुवि चञ्चलनयना विहारजनिभूमिः।
विञ्चूरभिधा विलसति चञ्चल्लक्ष्मीः पुरी निरीतिलवा। र.वि.1.11
तामिह रघुनाथभूपः पालयति गुणैर्गरीयसीं नगरीम्।

विञ्चूरपुरसंस्थाने 50 ग्रामाः आसन्। नासिकजनपदे अह्मदाबादजनपदे पूनाजनपदे च एते ग्रामाः आसन्। पञ्चवटीनिकटस्थं विञ्चूरपुरं रघुनाथनृपतिः पालयति स्म।

विञ्चूरकरवंशः

महाराष्ट्रस्थपूनाजनपदे स्थिते सासवाडाभिधनगरे दाणीसाख्याः रघुनाथवंशपूर्वजाः वसन्ति स्म। धान्यसङ्ग्रहणं तेषां कर्त्तव्यमासीत्। रघुनाथपूर्वजेषु विठ्ठलशिवदेवाख्यः 1695 खिस्ताब्दे लब्धजन्मा बाजीरावपेष्वासेनायां प्रधानभूमिकां निरवहत्। पानिपत् नामके युद्धे महत्त्वपूर्णं योगदानमकरोत्। स्वस्य

 In Public domain. Digitization Muthulakshmi Research Academy

आध्यात्मिकगुरोः आदेशेन भीमानीरानद्योः सङ्गमस्थाने नरसिंहस्वामिदेवालयनिर्माणं चकार। जीवनचरमदशायां पूनानगरमागतः। शिष्टं जीवनं तत्रैव यापियतुकामः विठ्ठलशिवदेवः बालाजीबाजीरावपेष्वाधिपतेः अनुमतिं प्रार्थयत्। रघुनाथाख्यस्य पेष्वापरिवारस्य शासकस्य आज्ञया विठ्ठलशिवदेवः विञ्चूरपुरं प्राप्नोत्। नैकेषु युद्धक्रियाकलापेषु पेष्वापालकनां सहायकः अभूत् सः। 1767 ख्रिस्ताब्दे विठ्ठलशिवदेवः विञ्चूरपुरं प्राप्य पार्थिवदेहं तत्याज। विञ्चूरपुरवासेन विठ्ठलशिवदेवपरिवारः विञ्चूरकरनाम्ना प्रसिद्धिं गतः। मराठाराज्यप्रतिष्ठायाः कृते आत्मानम् आहुतीकृतवान् विठ्ठलशिवदेवः।

In Public domain. Digitization Muthulakshmi Research Academy



नायकः – रघुनाथविञ्चूरकरः

जीवनस्य प्रमुखघट्टाः

1824 – जननम् 1827 - मातृवियोगः

1835 – प्रथमविवाहः 1836 - पितृवियोगः

1850-51 – पत्नीवियोगः

 In Public domain. Digitization Muthulakshmi Research Academy

1851 – (पत्नीवियोगात्) प्रथमतीर्थयात्रां कृत्वा प्रत्यागतः

1858 – पाठशालासंस्थापने ब्रिटिषसर्वकारस्य सहयोगः कृतः

1864 – द्वितीयवारं कर्णाटराज्ये तीर्थयात्रा कृता

1865 – तीर्थयात्रातः प्रत्यागनम्

1866-10-29 - "Companion of the most exalted order of the Star of India" award

1871 - विमातृवियोगः

1872 - Star of Empire award award

1875 – रतजपतकप्रदानम् 1880 – द्वितीयपत्नीवियोगः

1881 – दत्तपुत्रस्वीकारः (भास्कररावः (निराकृतः) शिवदेवरावः (निराकृतः)

1882-83 – मरणम्

1889 – ब्रिटिषसर्वकारेण दत्तपुत्रस्वीकारस्य निराकरणम्

रघुनाथविञ्चूरकरस्य सङ्क्षिप्तं जीवनचरितम्

रघुनाथः शूरः मतिमान् धृतिमान् उदारचित्तः दानशौण्डः संस्कृतकविपण्डितपोषकः भक्ताग्रगण्यः समर्थनेता कुटुम्बरक्षणकुशलः समाजसेवारतश्च। तादृशस्य महाशूरस्य सङ्क्षिप्तजीवनचरितमत्र प्रस्तूयते।

रघुनाथः ख्रिस्ताब्दे 1824 तमे वर्षे लब्धजनिः ख्रिस्ताब्दे 1882 तमे वर्षे स्वर्गस्थः जातः इति विञ्चूरकरवंशचरिते

In Public domain. Digitization Muthulakshmi Research Academy

उल्लिखितम्। नरसिंहः पितामहः विठ्टलरावश्च तस्य पिता। माता गङ्गाबाई। विमाता लक्ष्मीबाई यस्याः पुत्रौ कृष्णरावः माधवरावश्च। 1835 खिस्ताब्दे तस्य विवाहः सम्पन्नः। तस्य द्वितीयः विवाहः अपि जातः।

प्रथमतीर्थयात्रा

रघुनाथविञ्चूरकरस्य प्रियपत्नी दिवङ्गता। दुःखोपशमनाय सः तीर्थयात्रां कर्तुं सङ्कल्पितवान्। तीर्थयात्रां कृत्वा 1851 वर्षे विञ्चूरपुरं प्रत्यागतः।

ब्रिटिषसर्वकारेण सम्माननम्

मराठाशासनम् अस्तं गतम्। ब्रिटिषशासनमारब्धम्। ब्रिटिषसर्वकारस्य प्रसंशापात्रतां गताः रघुनाथविञ्चूरकरः तदीयभ्रातरौ च माधवरावः कृष्णरावः ।

1858 खिस्ताब्दे रघुनाथरावः ब्रिटिषसर्वकारस्य पाठशालासंस्थापनकार्यक्रमे साहाय्यम् आचरत्। स्वविञ्चूरपुरेऽपि पाठशालाः रघुनाथरावेन स्थापिताः। बहूनां जीर्णदेवालयानां पुनरुद्धरणं चकार।

द्वितीयतीर्थयात्रा

1864 तमे खिस्ताब्दे रघुनाथः द्वितीयवारं कर्णाटराज्ये तीर्थयात्रां चकार। 1865 तमे वर्षे तीर्थयात्रातः प्रत्यागतः रघुनाथः। रक्ताक्षिवत्सरविजयदशम्यां यात्राम् आरभ्य क्रोधनवत्सरविजयदशम्यां समापितवान्।

 In Public domain. Digitization Muthulakshmi Research Academy

ब्रिटिषसर्वकारेण सम्माननम्

"Companion of the most exalted order of the Star of India" इति बिरुदेन 1866 ख्रिस्ताब्दे अक्टोबरमासस्य 29 तमे दिनाङ्के रघुनाथः ब्रिटिषसर्वकारस्य मुम्बईनगरीयेन गवर्नराख्याधिकारिणा Sir Bartle Frere इत्याख्यातेन सम्मानितः। यदा Lord Northbrook मुम्बयीमागतः तदा 1872 ख्रिस्ताब्दे Star of Empire इति बिरुदेन रघुनाथरावः सम्मानितः। 1875 ख्रिस्ताब्दे Prince of Wales भारतदेशमागतः। तमतिथिमुद्दिश्य रघुनाथरावः संस्कृतश्लोकमयं प्रशंसापत्रम् अपठत् यस्य आङ्ग्लानुवादः डॉ. भण्डारकरेण विहितः। अनेन प्रसन्नः Prince Edward रजतपतकेन रघुनाथरावं सममानयत्।

1880 ख्रिस्ताब्दे रघुनाथस्य द्वितीयपत्नी दिवङ्गता। अनेन अपुत्रः रघुनाथः दुःखसागरमग्नः जातः। सः रामरावस्य पुत्रं भास्कररावं दत्तपुत्रत्वेन स्वीकृतवान्। तदा निजपितुः एक एव पुत्रः भास्कररावः सर्वाकारानुमतिं विना दत्तकरूपेण स्वीकृत इति व्याजेन मुम्बईस्थब्रिडिषसर्वकारः सम्मतिं न दत्तवान्। भास्कररावस्य दत्तस्वीकरणानन्तरं तदीयमाता अन्यं पुत्रं प्रसूतवती। पुनः रामरावस्य अपरं पुत्रं शिवदेवरावं दत्तकरूपेण रघुनाथरावः स्वीकृतवान्। तदपि सर्वकारेण निराकृतम्। रघुनाथः 1882-83 वर्षे दिवङ्गतः। रघुनाथस्य महती सम्पत्तिः कुटिलब्रिटिषसर्वकारायत्ता जाता इति दुःखावहः विषयः।

दिव्यक्षेत्रयात्रा

1864-1865 एकवर्षावधिका यात्रा रघुनाथेन विहिता। यात्राविशेषांशाः क्रमशः प्रस्तूयन्ते।

- रक्ताक्षिवत्सरविजयदशम्यां (1864 तमे ख्रिस्ताब्दे) विञ्चूरपुरतः रघुनाथः द्वितीयवारं महाराष्ट्रे कर्णाटराज्ये च दिव्यक्षेत्रयात्रां चकार। रघुनाथः तुरङ्गमारुह्य प्रस्थितः।

नासिकानगरी

मौनमुनिगोत्रोत्पन्नः दीव्यक्षेत्रयात्राय विञ्चूरपुरतः प्रस्थितः रघुनाथभूपालः गोदावरीमतीत्य नासिकानगरीं प्राविक्षीत्।

तृतीयविलासारम्भे नासिकायां नगर्यां रघुनाथेन दृष्टानि दिव्यक्षेत्राणि गद्यरूपेण कविना वर्णितानि।

1.गङ्गाद्वारम्

पञ्चतीर्थेषु अन्यतममस्ति। एतत् दक्षिणगङ्गेति प्रसिद्धिं गतम्। गोदावरीनद्याः उद्गमस्थानमस्ति। पुण्यस्थलमेतत् नासिकापुर्याः त्र्ययम्बकेश्वरस्य ब्रह्मगिरौ अस्ति।

2. कुशावर्तः

तदनु कुशावर्तनामके जलकुण्डे पुण्यस्नानमाचरितवान् रघुनाथः। ब्रह्मगिरेः शिलातलाघट्टनेन जनिता प्रवाहरूपा गोदावरी

 In Public domain. Digitization Muthulakshmi Research Academy

अत्र जलकुण्डरूपेण अवरुद्धास्तीति वदन्ति। कविवर्णने अपि एतत् स्पष्टीभवति।

3. बिल्वकतीर्थम्

इदमपि नासिकानगर्यां त्र्यम्बकेश्वरे अस्ति। नीलपर्वतस्य उत्तरदिशि अस्ति। रघुनाथः बिल्वकतीर्थे अभिषेकं चकार।

4. नीलपर्वतः

त्र्यम्बकेश्वरक्षेत्रे ब्रह्मगिरिनीलगिरिगङ्गाद्वाराश्चेति त्रयः पर्वताः सन्ति। तेषु अन्यतमे पापहारिणि नीलपर्वते रघुनाथः अनुष्ठानं चाकर।

5. कनखलतीर्थः

त्र्यम्बकक्षेत्रे प्रथितेषु पञ्चतीर्थेषु अन्यतमोस्ति कनखलतीर्थः। कनखलतीर्थे कृतस्नानः रघुनाथः त्र्यम्बकेश्वरक्षेत्रं प्राविक्षत्।

6. त्र्यम्बकक्षेत्रम् - त्र्यम्बकेश्वरः

नासिकापुरीतः 28 किलोमितदूरे गोदावरीनदीजन्मस्थानभूते ब्रह्मगिरिपादमूले त्र्यम्बकेश्वरदेवालयः विराजते। बालाजीबाजीरावः तृतीयपेष्वापालकः (1740-1760) पुरातनदेवालयस्य स्थाने नूतनम् एनं देवालयं निर्मापितवानिति इतिहासविदः वदन्ति। रघुनाथः त्र्यम्बकेश्वरस्य दर्शनं कृत्वा अर्चनं

चकार। महाराष्ट्रे विद्यमानेषु त्रिषु ज्योतिर्लिङ्गेषु त्र्यम्बकेश्वरः अन्यतमोऽस्ति।

नासिकानगरीतः निर्गत्य सप्तश्रृङ्गनरधामस्थां अष्टादशभिः भुजैः आश्लिष्टां पुरातनवाणीम् देवीं संसेव्य भूरिधनं वितीर्णवान्। ऐलनदीपरिसरे घुष्मेश्वरं प्रवराख्यनदीसङ्गमे गोदावरीतटे विराजमानं सिद्धेश्वरं नेवासे नामके पवित्रक्षेत्रे विद्यमानं मोहिनीरूपं विष्णुं भीमानदीजन्मस्थाने डाकिनीवने नीपवने विराजमानं भीमाशङ्करं मार्तण्डक्षेत्रे हरितीर्थनिकटमावसन्तं मार्तण्डनामधेयकम् ईश्वरं मयूश्वरक्षेत्रे विनायकं शम्भुञ्च संसेव्य नीरानरसिंहपुरं प्राविक्षत् रघुनाथः।

7. सप्तश्रृङ्गनरधामः अष्टादशभुजा देवी पुरातनवाणी

महाराष्ट्रस्थनासिकापुरीतः 60 किलोमितदूरे विद्यतेऽयं सप्तश्रृङ्गनरधामः। सप्तपर्वतानां श्रेणी इत्यतः सप्तश्रृङ्गीति निर्दिश्यते। सह्याद्रिश्रेण्यामन्तर्भवति सप्तश्रृङ्गी। अत्र विराजते देवी या अष्टादशभुजास्ति अपिच वाणीदेवीति निर्दिश्यते। वाणीनामकपत्तनं सप्तश्रृङ्गनिकटे वर्तते। वाणीनामकपत्तने देव्याः आभरणानि संरक्ष्यन्ते। मुख्यदेवालयस्य मण्डपाकारस्य मुख्यदेवालयस्य निर्माणं सतारासेनानायकेन कृतमिति अतिरिक्तनिर्माणं रघुनाथविञ्चूरकरेण विहितमिति ज्ञायते।

 In Public domain. Digitization Muthulakshmi Research Academy

8.ऐलनदीपरिसरस्थः घुष्मेश्वरः

महाराष्ट्रस्थः प्रसिद्धः ज्योतिःस्वरूपः घुष्मेश्वरः। घृष्णेश्वर इत्यपि व्यवह्रियते। प्रसिद्धानाम् एल्लोरागुहानां निकटे विद्यते घुष्णेश्वरदेवालयः। औरङ्गाबादतः 30 किलोमितदूरे वर्त्तते। महाराष्ट्रस्थे ज्योतिर्लिङ्गत्रितये अन्यतमोऽस्ति घुष्मेश्वरः। अस्य निर्माणं 13 खिस्ताब्दे अभूदिति ज्ञायते। देहलीसुलतानप्रभुभिः विध्वस्तः देवालयः 16 खिस्ताब्दे शिवाजिप्रभोः पितामहेन मालोजिभोसलेवर्येण पुनरुद्धृतम्। पुनः 18 खिस्ताब्दे अहल्याबाई होल्करवर्यया पुनरुद्धृतम्। रघुनाथविञ्चूरकरः घष्मेश्वरं समर्च्य अग्रे गतः।

9.प्रवरानदीसङ्गमः गोदावरीतटः सिद्धेश्वरः

महाराष्ट्रस्थाहमदाबादनगरे प्रवहन्ती गोदावर्याः उपनदी प्रवरानदी। प्रवरागोदावरीसङ्गमे विराजते सिद्धेश्वरः। सिद्धेश्वरदेवालयः पेष्वाकालीनः। रघुनाथः सिद्धेश्वरं संसेव्य नेवासे क्षेत्रं प्रविष्टः।

10.नेवासे पवित्रक्षेत्रम् मोहिनीरूपः विष्णुः

नेवासे इति अहमदनगरस्थं नगरम्। अहमदनगरं महाराष्ट्रे विद्यते। प्रवरानदीनिकटे विद्यते। नेवासे क्षेत्रे महिनीरूपस्य विष्णोः आलयः अतीव प्रसिद्धिं गतः। प्रतिवर्षं माघमासस्य पूर्णिमायां

उत्सवः आचर्यते। अत्र रघुनाथः विष्णुं संसेव्य भीमाशङ्करक्षेत्रं जगाम।

11.भीमानदीसङ्गमे डाकिनीवने नीपवने भीमाशङ्करः

भीमानदी चन्द्रभागानदी इत्यपि व्यवह्रियते। भीमाशङ्करपर्वतश्रोणौ अस्याः उद्गमस्थानमस्ति। अस्याः उपनदी एव नीरानदी। भीमानदीसङ्गमे विद्यते भीमाशङ्करदेवालयः। भीमाशङ्करः महाराष्ट्रस्थेषु त्रिषु ज्योतिर्लिङ्गेषु अन्यतमोऽस्ति। पूनाजनपदनिकटे अस्ति देवालयः। भीमाशङ्करः त्र्यम्बकेश्वरः घृष्मेश्वरश्च त्रयः ज्योतिर्लिङ्गाः महाराष्ट्रस्थाः अतीव प्रसिद्धाः। भीम इति असुरेण सह कृते युद्धे शिवस्य सहाय्यभूतेषु प्रमथगणेषु अन्यतमौ शाकिनी डाकिनी च। तयोरपि देवालयः अत्र विद्यते। रघुनाथेन दर्शितेषु दिव्यक्षेत्रेषु भीमाशङ्करदेवालयः अन्यतमः।

12. मार्तण्डक्षेत्रम् हरितीर्थः मार्तण्डेश्वरः

रघुनाथः मार्तण्डक्षेत्रे मार्तण्डेश्वरदर्शनं चकार।

13. मयूश्वरक्षेत्रम् – मयूरेश्वरः विनायकः

मयूश्वरक्षेत्रम् (मयूरेश्वरक्षेत्रम्) विशालदुर्गमयम् अस्ति। मयूरम् आरूढवतः विनायकस्य एव मयूरेश्वररूपेण पूजा क्रियते। पूनानगरनिकटे 64 किलोमितदूरे मयूश्वरक्षेत्रं विद्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

अष्टविनायकेषु आद्यः इति परिगण्यते अत्रत्यः मयूरेश्वराख्यः विनायकः ।

अन्यत्र गिरौ शम्भुं संसेव्य तदनु इरताणि मन्दिराणि अपि दृष्ट्वा रघुनाथः नीरानरसिंहपुरम् प्राविक्षत्।

14. नीरानरसिंहपुरम् - नीरानरसिंहस्वामिदेवालयः

रघुनाथविजयविलासचम्पूप्रबन्धे नीरनरसिंहस्वामि-देवालयस्य श्रीलक्ष्मीनरसिंहस्वामिनश्च सुविपुलं वर्णनम् उपलभ्यते। यतो हि स च देवः रघुनाथस्य कुलदेवोऽस्ति। महाराष्ट्रस्थपूनाजनपदे इन्दापुरतालुकायां नीरानरसिंहपुरमिति कश्चन ग्रामोऽस्ति। भीमानीरानद्योः सङ्गमस्थले श्रीलक्ष्मीनरसिंह क्षेत्रमस्ति। विञ्चूरकरपरिवारस्य कुलदेवतास्ति श्रीलक्ष्मीनरसिंहः। देवालयेस्मिन् दशशिलाशासनानि सन्ति। संस्कृतमराठी गुजरातीभाषासु शिलालेखाः दरीदृश्यन्ते। मन्दिरनिर्माणाभिवृद्धि जीर्णोद्धरणादिविशेषाः शिलालेखेषु लक्ष्यन्ते। विठ्ठलशिवदेव विञ्चूरकरः देवालयस्यास्य निर्माणं सार्धचतुर्लक्ष रूप्यकैः चकार इति पूनाजनपदगेजटीरपुस्तकाधारेण ज्ञायते। अपिच जीर्णदेवालयोद्धरणमपि चकार। शिलालेखविवरणमेवात्र प्रमाणम्।

Dr. S. Krishnamurthy and Vilas Wahane 'Inscriptions from Sri Lakshmi Narasimha temple at Nira Narasimhapur – Maharashtra- A study', Arnava

In Public domain. Digitization Muthulakshmi Research Academy

Vol X NO.2 Half yearly Year 2021, Pg. 67-84 इत्यस्मात् शोधलेखस्थशिलालेखात् चारित्रकांशाः उद्ध्रियन्ते। शोधलेखानुसारं देवालये विद्यमानेषु दश शिलालेखेषु षट् शिलालेखाः मराठीनागरिलिपिबद्धाः सन्ति। सप्तमशिलालेखः देवनागरीलिपिबद्धास्ति। अवशिष्टशिलालेखाः गुजरातीभाषालिपि बद्धास्सन्ति। 4, 5, 6, 7 शिलालेखानामेव विवरणमत्र प्रस्तूयते यतोहि एतदेव रघुनाथजीवनस्य सम्बद्धमस्ति।

शिलालेखः क्र.सं. 4

एषः शिलालेखः 1678 शके धात्री चैत्र शु.1 कालीनोस्ति। 1756 ख्रिस्ताब्दे मार्चमासे 31 दिनाङ्के बुधवासरे शिलालेखोयं लिखितः इति ज्ञायते। शिलालेखस्थाः विषयास्सन्तीत्थम् विठ्ठलशिवदेवदाणी पुनानगरीस्थसास्वाडनिवासी एतं देवालयं सोपानपङ्क्तिं गर्भगृहञ्च निर्मापितवान्।

“श्रीक्षेत्र नीरानरसिंहपुर घाटगाभारदेवालय चरणारविन्द विटलशिवदेव दाणी कसबे सासवड प्रा पुणे शके 1678 धातानाम संवत्सरे चैत्र श्रु 1”



 In Public domain. Digitization Muthulakshmi Research Academy

शिलालेखः क्र.सं. 4

शिलालेखः क्र.सं. 5

शिलालेखे उल्लिखितः कालसम्बद्धविशेषास्सन्तीत्थम्।

1678 शकः धात्री चैत्र शुक्ल 1, 1756 ख्रिस्ताब्दः मार्चमासः 31 दिनाङ्कः बुधवासरः पुनानगरीस्थसास्वाडनिवासिनः विठ्ठलशिवदेवदाणीत्यभिधस्य भृत्यः पूनाप्रदेशस्थसास्वाडनिवासी हरिनानाजिखलदकरजोषी कुलकर्ण्युपाधिमान् आलयनिर्माणस्य पर्यवेक्षणमकरोत्।



शिलाशासनस्य मराठीभाषागताः अष्टपङ्क्तयः -

श्रीविटल सीवदेव दाणी
कसब सासवड स्वामीचे से-
वेसी चरणारविंद हरि नाना
जी खलदकर जोसी कुलक
र्णी मौजे खलदक(र) सासवड व-
गैरेदेहय प्रा° पुणे प्रा° सु-
पे सके 1678 धाता नाम स-
वछरे चैत्र शुद्धा प्रतिपदा 1।।

शिलालेखः क्र.सं. 6

सतारा इति राजधान्याः पालकस्य शाहू इत्यभिधस्य शासनकालमुल्लिखति। 1678 शकः धात्री चैत्रमासः शु.1 ख्रिस्ताब्दानुसारं 1756 मार्चमासः 31 दिनाङ्कः बुधवासरः। बालीजीबाजीरावस्य सेनापती विठ्ठलरावशिवदेवदाणी नीराभीमानद्योस्सङ्गमे देवालयं निर्माय नरसिंहस्वामिनः विग्रहं प्रतिष्ठापितवान्। प्रह्लादनामकः शिल्पी विग्रहस्य कर्त्तास्ति। शके 1787, कार्तिके बहुलपञ्चम्यां (1865 ख्रिस्ताब्दे) रघुनाथरावविठ्ठलः देवालयस्यास्य जीर्णोद्धरणं विधाय श्रीलक्ष्मीनरसिंहस्वामिनं संसेवितवान्।

In Public domain. Digitization Muthulakshmi Research Academy



शिलालेखस्थाः मराठीभाषागताः पञ्चदश पङ्क्तयः

1.श्रीशङ्कर

2.सार्वभौम राजधानी सातारा येथील

3.अधिकारी शाहुराजां चें मुख्यप्रधान

4.ब्राह्मण बालाजी बाजीराव यांचे सेना

5.पती प्रथमपुरुष दाणी विठ्ठलराव शि-

6.वदेव वुमदे तुलमुलुक बाहादर यानी

7.शके 1678 धाता नाम संवत्सरे चैत्र शु 1 ।।

8.दिवसी नीराभीमरथी संगमात नूतन

In Public domain. Digitization Muthulakshmi Research Academy

9.मंदिराजी पूर्णताकरून प्रह्लादकृत

10.नृसिंव्हमूर्ती सिंव्हासनरूढकेली सां

11.प्रतव्या देवालयाचा जीर्णोद्धार संपा

12. दकापासुन पंचमपूरुष रघुनाथराव वि-

13. विठ्ठल यानी शके 1787 कार्तिक वद्य 5

14. राजी पूर्ण करविला येणे करून सर्वोत्त-

15. म श्रीलक्ष्मीनृसिंव्ह सुप्रसन्न होवोत।।

शिलालेखः क्र.सं. 7

षष्ठशिलालेखस्य संस्कृतच्छायेव सप्तमशिलालेखोऽस्ति।



1. ।।श्रीशंकर।।

2. श्री ।। नानामण्डलभूमिपालमुकुट प्रोत्कीर्ण

3. रत्नस्फुरत्कान्त्याथच्चरणौ सरोजमृदुलौ नीरा-

 In Public domain. Digitization Muthulakshmi Research Academy

4. जितौ प्रत्यहं।। यद्भीत्या प्रपलायिता रिपुगणाः
5. शीध्र्या इतीव द्रुतं यत्कीर्तिश्च दिगन्तराण्युप
6. गता विद्वद्विपत्या सह।।1।। तस्यासन्नवर शाहु
7. राजा नाम्नः सद्बुद्धिप्रसर विराजिमन्त्रिणोष्टौ।। त-
8. न्मध्ये द्विजमणि बाजिरायशर्मा तत्सूनुः समज-
9. नि बाल नामधेयः।।2।। सेनापतिः समभवत्किल-
10. तस्य शौर्यं चातुर्ययोः प्रकटनात्पतिसेवानाच्च-
11. दाणीत्युपाह्वाय धरः शिवशर्मसूनुः श्रीविट्ठला
12. भिध उदारमतिर्द्विजेन्द्रः।।3।। तेने भस्वर सभू-
13. शके मुदा यः प्रसादोऽरचि नृहरेः समर्पितः प्रा-
14. क्।। तं दृष्ट्वा शिथिलितं रहितज्ज पुत्रापौत्रो
15. भूत्खलु रघुनाथनामधेयः।। 4।। नूत्नं तं व्यत
16. नोच्च वील नृहरेः पादाब्जयोरर्पणाज्जीर्णोद्धारा
17. फलं यथोक्तं मनुना प्राप्नोतु तत्कारकः।। कर्तुर्व-
18. श समुद्भवाश्च पुरुषाः कीर्त्यायुरारोग्यतो लक्ष्म्या
19. ब्रह्मविदा चिराय सुखिनो नन्दन्तु सद्वासनाः।।

यदा राजा शाहू इत्यभिधः (राजारामः प्रथमः अथवा रामराजः मराठाकुलीनः (1749-1777 ख्रिस्ताब्दः) सतारां राजधानीं कृत्वा परिपालयति स्म तदा 1678 शके धात्री चैत्रमासे शु. 1 (1756 ख्रिस्ताब्दे मार्चमासस्य 31 दिनाङ्के बुधवासरे)

In Public domain. Digitization Muthulakshmi Research Academy

विठ्ठलरावशिवदेवदाणी पूनानगरस्थसास्वाडानिवासी बालीजीबाजी रावपेष्वापालकस्य सेनापतिः मुख्यप्रधानश्च देवालयस्य सोपानपङ्क्तेः गर्भगृहस्य च निर्माणं नीरानरसिंहपुरे विधाय नरसिंहस्वामिनः विग्रहस्य प्रतिष्ठापनं चकार। विठ्ठलशिव देववाणीभृत्यः कुलकर्णीत्युपाधिमान् हरिनानाजि खलदकरजोषी निर्माणस्य पर्यवेक्षणं चकार। देवालये जीर्णं गते विञ्चूरकरपरिवारस्य पञ्चमः पुरुषः रघुनाथरावविठ्ठलः 1787 शके कार्तिकबहुलपञ्चम्यां (1865 खिस्ताब्दे) देवालयस्य जीर्णोद्धरणं चकार।

15. पाण्डुरङ्गस्थली – श्रीपाण्डुरङ्गः

नीरानरसिंहक्षेत्रात् रघुनाथः श्रीपाण्डुरङ्गस्थलीं ययौ। पाण्डुरङ्गदर्शनञ्च चकार। महाराष्ट्रस्थपण्डरपुरे वर्त्तते पाण्डुरङ्ग क्षेत्रम्। पाण्डुरङ्गं संसेव्य कोलापुरीं जगाम राजा।

16. कोलापुरी – जगज्जननी

महाराष्ट्रस्थकोलापुर्यां नारायणपत्नी महालक्ष्मीः विराजते। तां संसेव्य रघुनाथः तन्नगरं विहाय नगराणि नदीश्च गिरीन् अतिक्रान्तवान्। चाळुक्यवंशजेन कर्णदेवेन निर्मितमिदं कोलापुरीपुण्यक्षेत्रम्।

17.कृष्णवेणी शैवलिनी - दत्तात्रेयः छाया देवता

महाराष्ट्रस्थसताराजनपदे जाता एषा कृष्णवेणीनदी कृष्णानदी इत्यपि अभिधीयते। तां कृष्णानदीतीरमभजत् रघुनाथः।

 In Public domain. Digitization Muthulakshmi Research Academy

नदीतीरे विराजमानं दत्तात्रेयं संसेव्य छायाभिख्यां देवतामपि समर्चितवान्।

18.कनकाचलग्रामः

कनकगिरिरिति पुरं कर्णाटराज्यस्थे कोप्पलजनपदे विराजते। रघुनाथः अत्र कञ्चन कालं स्थितवान्।

19.तुङ्गभद्रानदी – विरूपाक्षदेवालयः

कर्णाकटकस्थबल्लारीजनपदे विद्यमाने हम्पी अथवा पम्पाक्षेत्रे विराजते अयं विरूपाक्षदेवालयः अथवा पम्पापतिदेवालयः। विजयनगरसाम्राज्याधिपतिभिः निर्मितोयं देवालय इति श्रूयते।

20. कोणाख्यपुरम् चक्रतीर्थम्

रघुनाथः कोणाख्यपुरस्य चक्रतीर्थस्य दर्शनं कृत्वा रामं संसेवितवान्।

21. यन्त्रोद्धारकः मारुतिः

कर्णाटराज्ये हम्पी अथवा पम्पानगरे यन्त्रोद्धारकस्य हनूमतः देवालयोऽस्ति। राजा रघुनाथः हनूमतः देवालयं ददर्श।

22. तुङ्गभद्रा – विद्यानगरकरिकोणपुरपर्यायनामधेया किष्किन्धा

किष्किन्धां विद्यानगरकरिकोणपुरपर्यायनामधेयां नगरी सन्तीर्य चिन्तीमणीश्वरक्षेत्रं प्रविष्टः रघुनाथः।

23. चिन्तामणीश्वरक्षेत्रम् कपिलाश्रमः चिन्तामणीश्वरः

रघुनाथः चिन्तामणीश्वरक्षेत्रं ददर्श। अस्यैव कपिलाश्रमः अपरं नामास्ति। स अत्र चन्द्रशेखरं समर्चितवान्।

In Public domain. Digitization Muthulakshmi Research Academy

वसन्तकालमनयदत्र रघुनाथः। तदनु आषाढमासः आरब्धः। चतुरः मासान् यावत् अत्रैव उषित्वा रघुनाथः चन्द्रशेखरं संसेवितवान्। एकादश्यां रघुनाथः पञ्चाक्षरीमन्त्रजपेन अनुष्ठानं चकार।

अन्नदानम् - चिन्तामणीश्वरक्षेत्रे रघुनाथः अन्नदानं चकार। अस्य पुण्यकर्मणः विपुलं वर्णनं कृष्णकविः चकार।

धूमशकटारोहणम्

रघुनाथः क्रोधनवत्सरविजयदशम्यां दिव्यक्षेत्रदर्शनयात्रां परिसमाप्य हूणविरचितधूम-शकटमारुह्य दिनाभ्यां द्वाभ्यां सम्प्राप्य नासिकां त्र्यम्बकेश्वरमहारथोत्सवं निर्वर्त्य विञ्चूरपुरं प्राप।

इति बुधजनविनीता
डाँ. के. वरलक्ष्मीः
उपनिदेशिका

 In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy



रघुनाथविजयचम्पूप्रबन्धस्य कर्ता

श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति अपरनामाभिधः नवदुर्ग

(होसदुर्ग) कृष्णकविः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

रघुनाथविजयचम्पूः

प्रथमो विलासः

पद्यम् -

अव्यादव्याजदीव्यद्गुरुतरकरुणाम्भोधिरिङ्खत्तरङ्ग-
श्रेणीप्रोत्क्षिप्तदिव्यामृतमतिकलितात्यन्तहस्तावलम्बम्।
शेषाद्रीशस्य नित्यं वदनविधुकनच्चन्द्रिकासान्द्ररोचि-
र्दत्वा साम्राज्यलक्ष्मीं स्मितमिह रघुनाथाख्यभूपालमौलिम्।।1।।

काप्यागच्छति मामकीनभवनं त्रैलोक्यसंमोहिनी-
मेनां द्वारि न मुञ्चतात्र विदितं गोपीविटत्वं हरेः।
श्रुत्वेत्थं गदितं श्रिया प्रतिसखीर्यन्मोहिनीरूपभाक्
चक्रे तद्रघुनाथभूपमवतां नित्यं मुरारेः स्मितम्।।2।।

शुम्भत्संरम्भसम्भावितदितिजमदारम्भकुम्भीन्द्रकुम्भा-
लम्भारम्भोग्रदम्भः कटुविकटरदस्तम्भसम्भूतजृम्भः।
सम्भिन्नस्तम्भसीमासुरभयमहरद्यः कृपाकेलिसीमा
भीमानीरातटाकस्थितिरिह रघुनाथक्षितीन्द्रं स पायात्।।3।।

कन्तुर्मे क्व गतोद्य रुक्मिणि हरे हृद्येव जागर्त्यसौ
सत्यं ते वचनं यदद्य हृदि ते जागर्ति कन्तुद्वयम्।
गृह्णन्नित्यचिरात्कुचद्वयमये कामो हृदीतीरितं
मैवं भूरत एव चेष्टितमिति श्लिष्यन्सतां पातु वः।।4।।

 In Public domain. Digitization Muthulakshmi Research Academy

कलानाथः संमानयति रघुनाथावनिपतिः
स्वर्मूर्ध्नीति प्रायो निजचरणभक्तस्य चरितम्।
स्फुटीकर्तुं बिभ्रच्छिरसि शशिनं शेखरमणिं
प्रियो दाक्षायिण्याः श्रियमिह विधत्तां कृतिपतिः।।5।।

सदानन्दीड्यश्रीरजतधरसद्मा सुमनसां
प्रमोदार्थं हेमाचलमभिदधच्चापमनघम्।
कुमारश्रीवीक्षामुदित इह जैवातृकशिरो-
मणिः पायाद्भूपं सपदि रघुनाथं स्वसदृशम्।।6।।

श्रीवासब्रह्मतन्त्रादिमपदपरकालार्थवर्यानघाङ्घ्रि-
द्वन्द्वावानुग्रहात्तप्रतिपदविविधग्रन्थनिर्माणशक्तिः।
श्रीमत्प्रत्यग्रदुर्गस्थितिरिह तनुते संमतं सन्मतीनां
नव्यं काव्यं सुभव्यं मितमतिललितं कृष्णनामा कवीन्द्रः।।7।।

श्रीमन्तः परिपूर्णसद्गुणगणाः प्रख्यातवादान्यका
ये भूपा विलसन्ति तान्यदि कविः संवर्णयेत्केचन।
निन्दन्त्वेनमसूयया नरमयं स्तौतीति तत्रोत्तरं
ना विष्णुः पृथिवीशितेति वचनं तत्स्यात्कथं नृस्तुतिः।।8।।

तादृशकविताभावात्सुकवेः कवितां विनिन्दतात्कुकविः।
निन्दतु कुरूपजानिः परवनितां सुन्दरीं क्षतिः कास्याः।।9।।

निर्व्याजवत्सलहृदामुर्व्यां द्विगुणापि लाल्यतामिति।
कृतिवर्याणां कृतिरियमतिबालोक्तिर्हि लाल्यते सर्वैः।।10।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चवटीनिकटे भुवि चञ्चलनयना विहारजनिभूमिः।
विञ्चूरभिधा विलसति चञ्चल्लक्ष्मीः पुरी निरीतिलवा।।11 ।।

यस्यां सदा पुरि महच्छविदेहलीला-
लाल्या रघूत्तमसती तुलनां नितान्तम्।
गेहावलिश्च दधते ललनाश्च साध्व्यो
वैतानभूषिततया च मनोहराभाः।।12 ।।

यत्र मनोजवसत्त्वं दधते राजन्यसमुदयाः पुण्याम्।
आजानेया रुचिरा ललना अपि यौवनारूढाः।।13 ।।

यत्र स्त्रीणां मध्यमं मध्यमत्वं त्यक्तुं तत्त्वाधः शिरःस्वेष्टलाभम्।
अप्राप्यालं खेदतः कार्श्यमाप प्रायो न स्याद्गौरवं मध्यमानाम्।।14।।

यद्राजावसथाग्रभूमिषु नरैर्निद्रालसैर्यामिकैः
रात्र्यां मार्गवशाद्गवाक्षविवरे गच्छन्कदाचिद्विधुः।
घण्टासांशयिकैर्दृढं प्रतिहतो दण्डेन नूनं न चे-
त्कस्मान्मण्डलमध्यभुव्यतितरां धत्ते किणं श्यामलम्।।15 ।।

यत्कान्ताकान्तिचौर्योदितकुतुकतया जालरन्ध्रप्रविष्टो
रात्रौ सौधे प्रबुद्धैः सपदि निगलितासौविदल्लैः सुधांशुः।
आदातुं या अशक्तो निजरिपुललनावक्त्रवीक्षात्तभीति-
स्तत्रात्याक्षीन्नु मुक्ता इति हि दधति ता नाम तारास्तदेव।।16 ।।

तामिह रघुनाथनृपः पालयति गुणैर्गरीयसीं नगरीम्।
तेन पुरी सायोध्याभिख्यां न वहेत कथमिह धरित्र्याम्।।17 ।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चवटीरम्यत्वं स्मृत्वा स्मृत्वाधुना स तत्रैव।
नगरीं निर्माय निजामास्ते रघुनाथ इतीयमभिदधते।।18 ।।

तत्तादृक्षमहादशाननकथादिक्कारविश्राणना
प्रागल्भ्योल्लसिताखिलाग्रसुमनोहर्षा लसद्धर्मभाक्।
उल्लासं दधती सदा मनसि वैदेह्युक्तिकावर्णने
व्यक्तिः सा रघुनाथनाममहिता न स्यात्कथं वा भुवि।।19 ।।

यस्य च सहधर्मचरी स्थिरात्मजातात्यनर्घगुणभूमा।
जनकान्वयमोदकरी जयति तरां जानकीदेवी।।20 ।।

चन्द्रशेखरधर्माभिवर्धनं पतिमीयुषी।
जानकी रघुनाथं स्यान्नसानन्तात्मजा कथम्।।21 ।।

ऊर्मिलानन्दलहरीसन्दायिगुणभूषिता।
श्रुतिकीर्त्यग्रगा लोके यैषा विजयतेतराम्।।22 ।।

सिद्धार्थौ विजयान्वितश्च सचिवो दृष्ट्यन्वितोयन्मुदं
पुष्णाति प्रचुरामशोकलितः सन्मन्त्रपालः सदा।
बुद्धिः श्लाघ्यसुमन्त्रदत्तहृदयो नित्यं जयन्तं पुरः
कुर्वन् भूतलमर्थसाधकहितो यः पालयन्नेधते।।23 ।।

खरदूषणपारुष्यासहनं च श्लाघ्यता जनस्थाने।
अपि च जलध्युद्बन्धनचातुर्यं नाद्भुतं विभोरस्य।।24 ।।

सक्ता विष्णुपादे यदीयजननी संसिद्धितः पावनी-
यां प्रीतिं दधतीं च शन्तनुमतां प्राहुर्घनाः सज्जनाः।

या रक्तां च सरस्वतीं परिचिनोत्यादित्यजातादरा

गङ्गाम्बा स हि भीष्म एव समरे न स्यात्कथं भूपतिः।।25 ।।

यद्यपि गङ्गातनुजस्तदपि विशेषोऽस्ति यदिह राज्यसुखम्।

सह धर्मिण्या साकं स महीपालो भुनक्तीति।।26 ।।

सम्प्राप्तचन्द्रभागो यशसा यः पुण्डरीकवरद इति।

ख्यातः स विठ्ठलमहीनेता यस्याऽभवत्तातः।।27 ।।

बहुशस्तं भजतामिह कलयुतमतिश्रियं ददन्ति जनाः।

यस्य पितामहमवनौ नरसिंहेन्द्र इति सार्थनामानम्।।28 ।।

मत्स्याद्यवतारेषु श्रीरघुनाथानुजन्मता विदिता।

कृष्णस्येति स्फुटयति नूनं यस्यानुजश्च कृष्णविभुः।।29 ।।

श्रीमान्पोषितधर्मजातविजयो नित्यानिरुद्धाधिका(कः)

प्रद्युम्नप्रचुरोधिकं सरसहृद्देवः सुभद्रादृतः।

विख्यातो वसुदेवनन्दनतया सत्कामपालादरः

कृष्णाख्यां न कथं वहेत नितरामक्रूरसेव्यो विभुः।।30 ।।

नवनीतहृन्महोपलभावशकटकादिदाननिपुणपदः।

माधवविभुरिति सार्थाभिख्यो यस्यानुजोस्त्यन्यः।।31 ।।

वाचस्पतिरिव वक्ता सभासु यश्चोत्तरोत्तरायुक्तीः।

चित्रमिदं मौनान्वयसमाश्रितः सर्वदैष राजेति।।32 ।।

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् –

अपि चास्मिन्विस्मापनीयचरितनिरतविविधनरपतिकुलतिलकमुकुट-लसदरुणमणिपटलगलदमल घृणिमसृणितमुखदिनविगमसमयभवदरुणरुचि-पिहितलसदुडुचयसदृशनखमणिरमणीयचरणकुशेशयानुशयबान्धव इव वसुवितरणानन्दितद्विजराजे द्विजराज इव रत्नाकरवृद्धिदानचतुरे चतुरानन इव सदागमानुकूलवैभवे भव इव राजकलाभिरामे राम इव दानवारिसम्पत्करे करेणुकान्त इव कर्णोद्धूननजनितस्पर्शनविताने वितानपावक इव सदाज्यागमसम्भृतानन्दे नन्दनन्दन इव दिव्यसौन्दर्यगोप्यन्तःकरणमोहन इति प्रथाजनके जनक इव सुधन्वारातिक्षपणदक्षे दक्ष इव महाहवशरणागतार्याधि-क्षेपणोत्सुकमानसे मानससरोवर इव राजहंसाश्रितघनसारसवनाश्रितानिमिष कुले रणधूर्वहगर्वोत्पतदुर्वीश्वरखर्वेतरगर्वानलनिर्वापणवार्वाहसुपर्वाधिपगुर्वा-युधसर्वोन्नतिसर्वङ्कषाखण्डचण्डिममण्डलाग्रखण्डितरिपुमण्डले प्रत्युप्तप्रत्नरत्न-चित्रभित्तिकनिकाय्यनिर्यत्ननिर्यत्नपरिरब्धशुद्धशातकुम्भस्तम्भसम्भृतजम्भारि-मणितुलासम्भाराभ्यर्णसमुत्कीर्णमुकुरनिकुरम्बबिम्बितजाम्बूनदाप्रतिमप्रति-मानुषसुषमावलोकनसमाकलितरमाकृताकृतिनिसन्दोहसन्देहकन्दलितहृदयार विन्दपुरन्दरसुन्दरी सभक्त्यामुक्तमन्दारदामसन्देहदाननिदानवितानावलम्ब-मानस्वच्छमुक्तासरगुच्छविसरपरिशोभितविविधकौतुकस्थानकलितास्थ-मनीषिकदम्बसम्भृतमोदावहवादाहवकोलाहललीलाकर्णनसमुदीर्णकर्णहर्षे प्रतिदिनसमुदग्रसौधाग्रसभापर्यन्तनिरन्तराकलितचटुलनटनवारसारङ्गीदृगङ्गीकृ तसङ्गीतभङ्गीविवशान्तरङ्गीकृतस्वरङ्गणतरङ्गिणीरङ्गदुत्तुङ्गतरङ्गमालिकादोलिका-केलिकासक्तमरालिकायालिकासविलासग्रहणकौतुकसञ्चरच्छम्बायुधपुरनित-

म्बिनीकदम्बपदाम्बुरुहावलम्बिमञ्जुमञ्जुमञ्जीरसिञ्चितस्वसजातिरसितभ्रम परि-भ्रमद्भ्रमरपक्षविक्षेपविकीर्णसौवर्णार्णोजराजिविशङ्काकलननिपुणनिजदर्शनार्थनिबिडतानन्तसामन्तक्षमाकान्तसन्ततिदुर्वारसंमर्दपरस्परघर्षणोत्कर्षविच्युत-काश्मीराङ्गरागपरागपरावर्तितधूलीसमुत्क्षेपण केलीभरमदाकुलमदावलपदा-घट्टननिष्पिष्टरङ्गवल्लीमतल्लीमौक्तिकततिप्रतीहाराग्रजाग्रच्चत्वरसत्वरविसृत्वरभट पटलप्रतिक्षणावेद्यमानविविधविषयवृत्तान्ते मौनमुनिगोत्रकलशाम्बुधि-निशाकान्ते दान्ते रघुनाथक्षमाकान्ते परिपालयति प्राज्यं राज्यं चोरशब्दः कविप्रशंसायामेव धूर्तविचारो महीरूहेष्वेव चपलासक्तर्जलधरेष्वेव पद्मिनीदूषणं पद्मिकुलेष्वेव पार्थिवप्रतारणाविचारो वत्सरेष्वेव निरलङ्कृतित्वं कुकविकृतिष्वेव वक्रता कदाचन ग्रहेष्वेव हृद्रोगप्राचुर्यं शनैश्चरस्येवेति रचितव्यवस्थे निखिलजने वितीर्णराजदीप्तिसौभाग्यं समुल्लसति तरणिमण्डलमिव धरणिमण्डलम्।1।।

विरचितरक्षोबाधाविधूननो लक्ष्मणाग्रणी राजा।
रघुनाथः पञ्चवटीं जानक्या साकमतनुत समोदाम्।।33।।

श्रीनव्यदुर्गनिलयः कृष्णः कविसार्वभौमबिरुदाढ्यः।
प्रथमविलासं विदधे जवेन रघुनाथविजयेऽस्मिन्।।

इति कविकृष्णविरचिताया रघुनाथविजयचम्प्वाः प्रथमो विलासः।।

द्वितीयो विलासः

गद्यम् -

एकदा तस्य विविधतीर्थसार्थयात्रासक्तस्य रक्ताक्षिवत्सरविजयदशम्यां विजयदशम्याकलन कुतुकसरभपरिभ्रमदद्भ्रकरितुरङ्गरथनिकरायां रघुनाथ-महाराजस्य दुर्लङ्घाज्ञापथजाङ्घिकतया मुच्यमानतुरङ्गाणां बध्यमानपल्याणानां न्यस्यमानखलीनानां भूष्यमाणमदावलानां उद्ध्रियमाणनलकानां प्रविश्यमान-कञ्चुकानां प्रतिमुच्यमानसारसनानामुच्यमानग्रैवेयकाणामुत्क्षिप्यमाण-कौक्षेयकाणां गृह्यमाणासिधेनुकानां नह्यमानशिरस्त्राणानामारुह्यमाण-रथानामुह्यमानखेटकानां नर्त्यमानघोटकानां सज्जीक्रियमाणोष्ट्राणां नुद्यमान-रथानां उत्कम्प्यमानकुन्तानामुद्धूयमानोत्कम्पवसनानां क्रियमाणसिंहनादानां कार्यमाणकरिगर्जितानां चाल्यमानकशानां वल्यमानाजानेयानां निरुध्यमान-वनायुजानामास्फोट्यमानरट्टज्मनामाघट्यमानजयदुन्दुभीनामाच्छोट्यमान-हस्तानामट्यमानकाम्बोजानामावेष्ट्यमानशीर्षण्यपटानां विचेष्ट्यमानकलभानां उन्नट्यमानक्रमेलकानां एहि याहि देहि धेहि विधेहि निधेहि ब्रूहि पाहि जानीहि हरस्व विहरस्व परिहरस्व प्रहरस्व आहरस्व मोदस्व दयस्व कुत्र यासि तिष्ठ कदा महाराजो बहिर्निर्गमिष्यति किं करोति कुत्रास्ते निर्गत एवेदानीं नास्त्यवकाश इति जल्पतां प्रतीक्षमाणानां तद्दर्शनं धिक्कृतप्रतिभटकरटि-घटानामुज्जृम्भितप्रतापच्छटानां युद्धरङ्गोन्नटानां बहुधैर्यस्फुटानां दुर्वारसंमदोत्कटानां यशोविमलितदिक्तटानां मदारुणान्तद्दक्पुटानामत्युद्भटानां भटानां पटलैश्चटुलैर्निबिडमभूद्दर्शनार्थसञ्चरत्काञ्चनाङ्गीचञ्चलापाङ्गवन्दन-मालिकाञ्चितविञ्चूरपुरमञ्चिताखिलश्रीभरम्।1।।

पद्यम् -

रक्ताक्षिवत्सरेऽस्मिन्कस्माद्दुन्दुभिरुपागत इतीव।
रोषभरान्मौहूर्तिकमतेन जघ्नुर्भटा जयार्थं तम्।।1 ।।

अतिनिर्दयजनमर्दितघनमर्दलनर्दनार्दनोर्दण्डतरम्।
मददुर्दिनबहुदुर्दमरिपुकर्दमतर्दनार्ककुर्दनकलितम्।।2 ।।

बहुसुन्दरघनदुन्दुभनिनदं धुरि मन्दराद्रिकन्दरदलनम्।
पटुपटहपटलचटुरवघटितं शुश्राव भूपतिश्रेष्ठः।।3 ।।

गद्यम् –

तावदेव भावजपरिभावव्यापारलोलरूपानन्दितनिखलजनवृन्दो मन्दं मन्दं वसुन्धराधुरन्धरः समुत्थाय सिंहसंहननसिंहासनादीयमानहस्तावलम्बोल्लम्बमानबाहुना करतलकलितसुकुमारवसनेन परिजनेन सविनयं निवेद्यमानमार्गः पदे पदे रक्षिवर्गैरक्षिमार्गप्रविष्टमात्रान्मर्त्यानयमयमेवेति जनानोशिमानाधिकगाम्भीर्यादप्रकाशितकुतूहलो यथा मर्यादमार्यांस्तांस्तान् सम्भावयमानः सगौरवमन्मद्वंशललामभूतस्य रघुनाथस्य बिभर्ति नामधेयमेष राजेत्यादरान्मूर्धानमुपाघ्रातुमुप्युपरि मकुटिं लम्बमानेन सौकुमार्यसौन्दर्यविलोकनविवसितहृदयतयालिङ्गितुमदःप्रसारितैकतरभुजदण्डेन मार्तण्डेनेव बुधानुगतेन सौवर्णदण्डाग्राधिष्ठितेन मरकतकलशकलितेन कनकगुणरचितातपत्रेण विभूषितमकुटीतटस्तत्तादृशसौन्दर्यावमानिततया जितोऽस्मीत्युपहारकृते कन्दर्पेणार्पितैस्तुरीय बाणनवमल्लिकामतल्लिकापुञ्जैरिव चामरैः वीज्यमानो निर्गत्यास्थानादग्रतः सज्जीकृतान् मुहुर्मुहुः करपुष्कराञ्चलनीरन्ध्र-

 In Public domain. Digitization Muthulakshmi Research Academy

निष्ठीव्यमानजलशीकरनिकरतया पदे पदे निषादिकरकलित निरङ्कुशाङ्कुशघट्टन-वेदनासहनतया निजजन्मभुवमपि परित्यज्य कुत्रापि यातुं नासिकाविवरान्निर्गतान्मौक्तिपुञ्जानिवात्मजवत्सलतया राजसमीपं यातेत्युक्तिरतो गजवरान्विलोकयन्विन्यस्य पञ्चषानि पदानि जयाशीर्वचनपूर्वकं द्विजव्रतप्रदत्तान् करकञ्जमञ्जुलकिञ्जल्कपुञ्जानिव अक्षतजयानक्षतचयान् सङ्गृह्णानो विनयविनमितोत्तमाङ्गतया वदनचन्द्रातिमात्रसन्निधानात्तत्क्षणं सङ्कुचितेन भक्त्युन्नमितेनाञ्जलिपद्मेन यथोचितं मानयन् तांस्तान्समीक्षमाणोध्यक्षानखिलान् सैनिकांश्च निजविरोधिगजराजसाध्वसादिव प्राप्तसङ्कोचानां तुङ्गरङ्गतुरङ्गतरङ्गसङ्गतवाहिनीसमुन्मेलदम्बुजकुड्मलानामिव तदुदञ्चितानामञ्जलिपुञ्जानां निजवदन चन्द्रकटाक्षचन्द्रिकाप्रसारणेन चिरस्याप्यप्रदत्तविकासः सादरं परिजनदत्तकरावलम्ब आरुरोह निजजवविजितविहङ्गमं तुरङ्गमम्।2।।

पद्यम् -

तावद्ब्रह्माण्डभाण्डत्रुटनपटुतरोद्दण्डदण्डप्रचण्डा-
घातस्फीताविगीतास्फुटपटहसटाभेरिकाधीरनादैः।
हेषाघोषात्तहस्तोद्भटकरटिघटागर्जिताढ्यार्जितात्ति-
स्थैर्यैश्वर्यैर्भृशमखिलदिशां दन्तुराण्यन्तराणि।।4 ।।

द्वेधा मध्यामवर्णं तुरङ्गमारुह्य चलति निखिलबले।
रघुनाथमहीपालो रञ्जितलोकः पुरान्निरगात्।।5 ।।

कटुतरचण्डभानुकरतापभरं सह तेन
हि मम पालकोऽयमिति सादरया धरया।
विपुलमुदञ्चितं दिवि वितानमिवातिधनं
व्रज उदजृम्भताश्वखुरदारुणदारणजम्।।6 ।।

In Public domain. Digitization Muthulakshmi Research Academy

माद्यद्वन्धुरगन्धसिन्धुरचलत्यादातपादाहति-
क्षुण्णक्षोणितलोच्चलद्वहुरजःप्रोद्भिन्नदिग्भित्तिका।
हेषाघोषविघूर्णिताहितचमूयोधाधिनाथोद्भटा
नृत्यत्तुङ्गतुरङ्गपुङ्गवघनारङ्गीच्छुभाङ्गी चमूः।।7।।

स्तुत्वा सर्वंसहेति प्रतिपदमखिलास्ताडयन्ते पदैर्मां
यस्या लोके क्षमावांस्तमखिलमनुजाः क्लेशयन्ति ह्यजस्रम्।
स्तुत्येषां किं ममेति क्षितिरतिकुपिता सर्वलोकोपरिष्टा-
दारूढे वा बिभासे बलचलितमहाधूलिकापालिकाग्रे।।8।।

बहुचत्वराभिरामासमुदीश्चतमत्तवारणोन्नासाः।
रथ्या विविशुः पुरतो विलसितसुखलीनगन्धर्वाः।।9।।

पटुतरकोणताण्डवविजृम्भितकुम्भिवर-
स्थितघनदुन्दुभिप्रचुरभांकृतिसंश्रवणात्।
मम शिशवः शिशुर्मम कुत्र गता इति
जननीजनैर्ममृगिरे धुरि माणवकाः।।10।।

मत्ते देहि ममावकाशमबले तिष्ठात्र मुग्धे मना-
गुन्नम्याननमत्र पश्य ललिते त्वं तिष्ठ दष्टं मया।
मन्दे तत्र नृपोऽत्र पश्यसि किमु स्निग्धे तवापि स्थिते-
रत्रास्तेन्तरमम्ब किञ्चिदपि मे द्रष्टुं न हृत्स्थेन्तरम्।।11।।

हित्वा सर्वां समृद्धिं वनभुवमदिशज्जानकीलक्ष्मणाभ्या-
मेवं प्रागद्य मत्वा नगरततिमयीं सर्ववन्यां च धन्याम्।

द्रष्टुं सञ्जातहर्षश्चलति बलयुतः प्राज्यसाम्राज्यपूज्यः
जानक्या साकमालोकयसपरिजनो लक्ष्मणान्वीयमानः।।12।।

मा स्प्राक्षीरिति जल्पसि प्रतिपदं कस्मादिहास्यागता
सन्धे त्वं नियमस्थिता यदि पुनः कस्माद्दिदृक्षा तव।
इत्थं सौधतलेषु पौरललना भूपालदत्तेक्षणा
लज्जाहासविलासमञ्जुलतमा अद्राक्षुराराच्चमूम्।।13।।

सौधाग्रस्थितललना बाहुलताग्रान्नृपालशिरसि तदा।
दरदलितकुड्मला इव लाजा जगलुर्मुहुर्मुहुर्विमलाः।।14।।

एतत्सदृशं ललनाकुचयुगलभूषितं कनकचौलैः।
इति कुतुकात्कनकपटीभूषितकुम्भा ववल्गुरिव डिम्भाः।।15।।

वयमिव सैन्धव एष क्षमामहे नेन्दुमेवमूर्ध्वस्थम्।
इति तं पातयितुं ध्रुवमुदग्रचरणा हयास्तदारिङ्खन्।।16।।

गद्यम् –

निवर्त्य चानुव्रजतः प्रजाव्रजाननुजादीन् महाराजान् द्विजांश्च भूरितेजा राजा विसृत्वरत्वरो यावद्दिव्यक्षेत्रयात्राकुतुहूलमुन्मस्तकयति स्वयं तावदुद्वला-यद्भिस्तुरङ्गमान् प्रेङ्खयद्भिः क्रमेलकान्नादयद्भिर्वारणान्वादयद्भिर्वादित्राणि जृम्भयद्भिर्दुन्दुभिभाङ्कारानाज्ञापयद्भिः सरभसगमनं उत्कम्पितकेतनमुच्चलित-चामरमुन्नर्तितजालकातपत्रमुन्मस्तकघण्टारवमुन्नीतधूलिपालिकमुद्दामहैषाघोष मुद्धूतालस्यमुदञ्चितान्दोलिकावहनधुरीणजनविविधमादमनन्यमानसैः सैन्यै-रतिक्रान्तबहुदूरवर्त्मा धर्मात्माद्रतस्तत्र तत्र सलिलक्रीडासक्तयौवनोद्धतमुग्ध-सिग्धवधूकुचकनककलशचर्चितमसृणघसृण पङ्कक्षालनपाटलैकदेशतया

तदञ्जनक्षालनातमेचकिमैकदेशतया च वृद्धगङ्गेयमावयोः पूज्या सखीति प्रेमातिशयेन समागताभ्यां सरस्वतीकलिन्दनन्दिनीभ्यामिव कृतपरिरम्भां क्वचिन्मृदुलतरपुलिन खेलदतिसुकुमारलक्ष्मणाविक्षणकलकलरववाचालितया निजतटविरचितविहारः पुरा पुनरिदानीं स एव जानक्या साकमाकलित-लोकानन्दो रघुनाथभूमीन्द्रः समागत इति सुखागमनवार्तामिव पृच्छन्तीं निरीक्षितचरीं गोदावरीमतीत्य सत्यसन्धो विरचितनिखिलजनसुखासिकां नासिकां नाम नगरीं प्राविक्षीत्।।3।।

पद्यम् -

प्रोद्यत्क्रेधेन यत्राग्रजमनुसरता लक्ष्मणेन प्रलूना
नासा रक्षोभगिन्या रघुकुलपतिना यत्र धीराग्रगेण।
तादृक्षक्रूरवृत्तक्षुभितसुरपतिप्रष्ठलोकाधिपालाः
पौलस्त्याज्ञाधुरीणाः सपदि विदलिता भीषणा दूषणाद्याः।।17 ।।

मदनमदहारिरूपो भूपो जात्वप्यनात्तगन्धोऽपि।
आत्मानं पश्यन्तीमानन्दयदेष नासिकां चित्रम्।।18 ।।

गोकन्याक्षितिगन्धसिन्धुरमहावाहालिगेहादिमा-
सङ्ख्यातप्रतिपादनाञ्चितबुधोप्येष क्षमावल्लभः।
गोदातीर्थनिषेवणादनुनुतात्मानं धुताघं बत
प्रायोऽहं कृतिदूरगाः क्षितितले सन्तो महान्तो जनाः।।19 ।।

श्रीमन्नवदुर्गस्थः कृष्णकविः सार्वभौमबिरुदाढ्यः।
द्वैतीयिकं विलासं विदधे रघुनाथविजयेऽस्मिन्।।

इति कविकृष्णविरचिताया रघुनाथविजयाख्यचम्प्वा द्वितीयो विलासः।।

तृतीयो विलासः

गद्यम् –

तदनु यथाक्रमं कृतनिमज्जनो निखिलमङ्गलतुङ्गाधारे गङ्गाद्वार आरचिताप्लवः समुन्नतशिलातलाघट्टनजनिताकृशावर्ते कुशावर्ते अङ्गीकृताभिषेकः मकरन्दतुन्दिलहल्लके बिल्वके निर्वर्तितानुष्ठानः परिधृतनिखिलकलिकल्मषाभीलगर्विते नीलपर्वते ऊरीकृतस्नानः पावितजनकुले कनखले च तीर्थे परार्थे भूतलावतीर्णत्र्यम्बकपदाम्बुजसेवाभिलाषसमागतपुरन्दरपुरसुन्दरीवृन्दरीतिहरणनिपुणरमणीजनशरणीकृतमणिविमानसमानलसमानकूलरत्नसौध यूथनिबिडितस्य हृद्यनिषध्यातलप्रसारितशस्तकस्तूरिकादिनिस्तुलवस्तुपरिमिलत्परिमलकृतानगलपुष्पन्धयधुरन्धरवृन्दनीरन्ध्रतया निजाधिनाथं त्र्यम्बकमनुकर्तुं नागाजिनेनेव रचितावगुण्ठनस्य त्र्यम्बकक्षेत्रस्य निरुपमालङ्कारवज्रमणिं निजनेत्रसाधर्म्यावलम्बनेच्छयेव त्रिधावतीर्णं त्र्यम्बकं नाम भगवन्तमुमाकान्तं संसेव्य सानन्दबाष्प इत्थमस्तौषीत्।।1।।

पद्यम् -

भगवंस्त्र्यम्बक इति किल निगमान्तैर्गीयते भवान् सततम्।
तदपि समदृष्टिरसि यच्चित्रमिदं किं ब्रवीमि तव चरितम्।।1।।

त्वं त्र्यम्बकोऽपि चित्रं पञ्चाम्बकमथनकृतमुखोऽसि विभो।
न हि साधनसम्पत्तिः फलाय तद्वद्यथा तेजः।।2।।

त्वं नीलकण्ठ एव श्रीमन् सन्मानसे कथं नित्यम्।
विहरसि विचित्रमेतच्चरितं तव कुमुदबन्धमौलिमणे।।3।।

ये वृषवन्तो धरणौ तेषां सुलभोऽसि देव पुरवैरिन्।
वृषमुत्सृज्य पदं वा न चलसि वृषवाह यस्मात्त्वम्।।4।।

दोषाकरमपि शिरसा दधदश्रान्तं भवन्तमिह भजतम्।
दोषाणि धुनोषि विभो वृत्तिस्ते नयनवद्विषया।।5।।

अत्रिनयनप्रियोऽपि त्रिनयनमुकुटेन किमिति ते श्लाघ्यः।
इन्दुर्हिमसम्बन्धादथ वा हिमवत्सुताकान्तः।।6।।

आचरसि हि भिक्षाटनमथापि सम्पत्तिमादधासि नृणाम्।
परमेश्वरोऽसि कस्माद्दिगम्बरोऽसीति शिक्षकः कस्ते।।7।।

पञ्चाननः षडाननमहितोऽसि विचित्रमन्यदेतच्च।
त्र्यम्बकसहस्रनयनाञ्चितोऽसि नित्यं यदेष त्वम्।।8।।

गद्यम् –

इत्यभिष्टुत्य हृष्टमानसः स महीपालमणिश्चिरतं महानटजटाजूटकोटि-कोटरतटनिवास जनितविरहकृशशशाङ्कपरिरम्भारम्भसम्भ्रमवितरणार्थावतीर्ण-तारावलीभ्रान्तिदन्तुरीकरणनिपुणस्मेरानघमुक्ताहारावलीः ज्योतिःस्वरूपोऽयं त्र्यम्बकेश्वर इति तत्रैक्यमुपगन्तुमागता विद्युल्लता इव दिव्यकनकपटीश्च पटीयस्या भक्त्या समर्च्य तस्मै चिरतरं किमपि किमपि मनसि महारथोत्सवादिपरिष्कारनिष्कर्षं निष्कासितसंशयं विचिन्त्य यावत्तद्दिव्यालयान्निर्गच्छति तावदताडयन्त दुन्दुभीनमर्दयन्त मर्दलानुदैरयन्त तूर्याण्युदघोषयन्त जयजयशब्दाननर्तयन्त वारवधूटिका व्यसयन्त धवलान्त-पत्राण्याकम्पयन्त चामराण्यचालयन्त कुन्तानवल्गयन्त तुरङ्गानद्रावयन्त शताङ्गानगर्जयन्त मातङ्गानचारयन्त पदातीननादयन्त काहलानवादयन्त

पटहाद्यवाद्यानतर्जयन्त क्रियामन्दान् क्वचिद्धृष्यन्तो घुष्यन्तो हसन्तः परापतन्तो निश्वसन्तो ब्रुवन्तस्तूर्णं यातेति धून्वन्तः शिरांसि तन्वन्तोञ्जलीनमुञ्चत आनन्दबाष्पान् सिञ्चन्तश्चन्दनवारिभिर्जनान् सैनिकांश्च स्वकृत्यसज्जीभूता एवं यावद्ध्वन्तितावद्यथापुरं प्रविश्य नैजोपकार्यामार्याणां यथामर्यादमपर्याप्तं वितीर्य धनं महीपालवर्यौ निर्गत्य तस्मान्नगरादतिक्रम्य रम्यान्प्रदेशानगणितश्रुङ्गसङ्गतेऽपि सप्तश्ङ्गनरधामे भूमिधरे पुराणैरिव पुरातनवाणीमष्टादशभिराश्लिष्टां भुजैरजय्यैः संसेव्य भव्यां देवीं प्रदाय प्रमदादुदारोवदातकीर्तिर्यथेष्टं तुष्टचित्तो वित्तं तत्तदनुगणे महाजनेभ्यो विहाय तदपि स्थलमैलनदीपरिसरभुवि ज्योतिर्मयमभिवन्द्यारिजनभीष्मं घुष्मेश्वरं पुरस्कृत्यापि तं पश्चात्कृत्य गोदाः प्रायेण प्रवरासङ्गदत्तचित्ता भवन्तीति सूचयितुमिव जगता प्रवराख्यनदीसङ्गमनुभवन्त्याः सकलजगच्छ्रीदायाः गोदायास्तटभुवमधिवसन्तं गोदाश्रिताः प्रवराश्रिता वा पुंसिद्धाः भवन्तीति निदर्शयितुमिव सिद्धेश्वराभिख्यां प्रख्यापयन्तं हैमवतीकान्तं प्रणम्य सम्यग्विसृज्य तं च प्रदेशं निखिलजगत्सम्पन्निवासं निवासं नाम प्रविश्य पवित्रं क्षेत्रं प्रणम्य मोहिनीरूपं भगवन्तं रमाकान्तमतिक्रम्य तत्क्षेत्रं भीमानदीजनिभूमौ डाकिनीवने नीपवने घने निखिलसुरस्तोमातङ्कहरं भीमाशङ्करं निखिलनयनमात्रज्योतिःस्वरूपोऽयमिति न्यूनतामपहर्तुमिव शुद्धज्योतिःस्वरूपं नयनपदवीजङ्घालमारचय्य विरहय्य तामपि स्थलीमन्यत्र क्वचिन्निखिलजनोद्दण्डाज्ञानमण्डलविषतरुखण्डखण्डनप्रचण्डदात्रे मार्तण्डक्षेत्रे निर्मलजलहरितीर्थनिकटमावसन्तं नित्यतेजोनिधिं त्रयीतनूमपि मां तनूकृत्य पृथिव्याद्यष्टमूर्तिता प्रकटिता त्वया को मेतिशयः प्रतिपादित इति कुपितं

मार्तण्डमाश्वासयितुमिव विसृष्टान्यनामाविचारमाश्रिततन्नामधेयोपपदं ईश्वरमभिवन्द्यानन्तरं च कविवचोदूरे मयूश्वरक्षेत्रे प्रणिपत्य निखिल-जगदभयदायकं विनायकमितरत्र गिरौ विलोक्य प्रवर्धितजगदुत्सवारम्भं शम्भुं महादेवमग्रतो विलोकयन् विविधविलासिजनविहरणाभिरामानारामान् विपुलवनलक्ष्मीवज्रमुकुरशङ्काकरानपि पङ्कजाकरान् तत्र तत्र चित्तहारिमत्त-काशिनीनृत्तसमयसमुदितमङ्गलमृदङ्गधिन्धिमिध्वानबन्धुराणि सिन्धुराज-वसुन्धराधरनन्दनारमणमणिमन्दिराणि च पुरतः पार्श्वद्वयनिरन्तरशशिकान्त-मणिकान्त निशान्तबहिरुपान्तसन्ततसम्वर्धितनारिकेलपालिकीरकुलकल-कलमुखरं राजदजिह्मतरं नीरानरसिंहपुरं प्राविक्षत्।।2।।

पद्यम् -

भीमासङ्गममधुरा यत्र समिन्धेभिप्रोषितद्रुपदा।
पाञ्चालीव नितान्तं नीरादधती धनञ्जयासक्तिम्।।9 ।।

यत्र च

क्रुध्यत्कल्पान्तकालीविटनिटिलतटीप्रस्फुटद्वह्निलोल-
ज्वालाभीलात्मलीलाभररिपुपृतनाध्यक्षविक्षोभदक्षः।
स्तम्भादुज्जृम्भमाणः पुरहरसुरराट् प्रस्तुतो ध्वस्ततोषा-
न्विश्वानाश्वास्य शश्वद्वसतिसुरनरान् धिक्कृतां हा नृसिंहः।।10।।

मञ्जुलवानीरायां नीरायां विरचिताप्लवोऽसौ मोदात्।
खेदान् परिधुन्वन्तं तन्वन्तं श्रियमियेष देवं द्रष्टुम्।।11।।

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् –

तावन्निजागमनविचारनिशमनजनितजवैर्नरहरिपरिवारजनैः समर्यादं सज्जीभूतैरत इति नीयमानो मानवपतिरग्रतो जाग्रतो विलोयल्लोकांस्ताड्यमानभेरीकैर्नाद्यमानवीणैर्वाद्यमानवादित्रै श्चोद्यमाननर्तनै-रापाद्यमानहस्ततालैर्नुद्यमानोत्तम्पवसनैर्भिद्यमाननारिकेलैश्चोद्यमानदिव्याम्बवरै र्विद्यमानभगवद्दिव्यगुणैस्तुद्यमानजडजनैर्विद्यमानफलकुसुमैर्वेद्यमाननरहरिमा मधेयैरासाद्यमानान्दैराह्लाद्यमानपरस्परैरद्यमानताम्बूलैरखिद्यमानवदनैरुत्साद्य मानजनसन्धैः प्रसार्यमाणोपहारैरुदीर्यमाणतानैर्विचार्यमाणशास्त्रार्थैरुदीर्य-माणानन्दबाष्पैः प्रचार्यमाणनिर्गमघोषैरुच्चार्यमाणपुराणैर्विस्फार्यमाणलोचनै-रुद्धार्यमाणाञ्जलिपद्मैराकार्यमाणस्वस्वजनैरापूर्यमाणभक्तिभिरुत्प्रेर्यमाणकुसुमैर वार्यमाणपुलकैरास्मर्यमाणहिरण्यकशिपुमथनकथाविशेषैर्विस्तार्यमाणमार्गैः परिस्तीर्यमाणवसनैर्विकीर्यमाणलाजाञ्जलिभिस्त्वर्यमाणस्त्रीजनैर्ध्रियमाणाभरणैः क्रियमाणप्रणामैराद्रियमाणभगवतैर्वीज्यमानचामरैस्त्याजमानान्यविचारैरनुभु ज्यमानभगवद्दिव्यविग्रहसौन्दर्यसेवनैरज्यमानहृदयैः परिष्वज्यमानमित्रैः सृ-ज्यमानस्वस्वविद्याकौशलैरुत्तेज्मानप्रदीपैर्विभज्यमानगोष्टीकैः सज्ज्यमान-चन्दनैः प्रसज्यमानपटवासकैस्तर्ज्यमानशब्दैर्नेर्ग्यज्यमाननीचजनैर्नीराज्यमान-भगवच्चरणारविन्दैर्भ्राज्यमानप्रदीपैश्चानेकविधजानपदचातुर्वर्ण्यजनैः सर्षप-प्रदेशस्याप्यप्रदत्तावकाशं क्वचिन्निरन्तरसान्द्रचन्द्रशालाजालाग्रविसरदसदृश-पद्मरागपुञ्जमञ्जुलमयूखरेखानिलोकनजनितया समुदयदारुणकिरणकिरण-समुदयमनीषया क्षपास्वप्यपरित्यक्तप्रियतमश्लेषैः सन्तोषैश्चक्रवाकैरलङ्कृत-विटङ्कां क्वचिदुदग्रसैधाग्रयूथाग्रगवाक्षलक्षनिर्यत्नानिर्यत्ततादृशमुक्तावज्रमणि-घृणिदर्शनसमुद्भूतया शिशिरकरकरनिकरधिषणया दिवापि लेलिह्यमान-

रसनैश्चकोरनिकुरुम्बैः परिष्कृतदेहनीकां क्वचिदन्तरान्तराखचितसौवर्णलता-वितानबलरिपुनीलसौधशतविलोकनोदञ्चित्तहृद्यविद्युल्लशताञ्चितसद्यःसमुद्भवद म्बुधरकदम्बबुद्धितया वर्षेतरसमयेऽपि निरन्तरकृतताण्डवैः शिखण्डि-मण्डलैर्मनोहरां श्रीनृहरिदिव्यालयाभ्यर्णवगेहवीथीं कथञ्चिदतिक्रम्य प्रविश्य भगवद्दिव्यालयं पुरतः सकललोकलोचनभागधेयमिव मूर्तिमूर्तिभूतं विनताखिलजनताधिकघनतापहघनतादृशमोदावहपादाम्बुजयुगलगदगणितत तसितमुक्तामणियुक्ताद्भुतहंसकसमहंसकयुतमतिकृतिपतिमतिततिभृतिजङ्घालसु जङ्घायुगममलाननकमलाञ्चितकरिवरकरनिभशुभविभवोरूल्लसदरुज्ज्वलहेमाम्ब रधामाधिकघृणिमणिगणझणझणझणदञ्चितघनकाञ्चनमयकाञ्चिकमतिराहूपम बाहूल्लसदरिदरवरमरिदरकरमुरसाचितसरसीरुहनिलयं धृतवलयं सुरनुतमङ्ग-दोल्लसितमधिकं गदोल्लसितमरुणकरकिरणसमतरुणमणिसरणिसरसुन्दरतरं हृदयमन्दिरतलाल्लसितशस्ततररुचिकलितकौस्तुभमणिं सततमिन्दुसुन्दररुचिं दयानिधिममन्दसान्द्ररुचिसरससरसिरुहरुचिररुचिनिचयगिरिमभरमथनदक्षिणे क्षणमनुक्षणक्षपितरूक्षराक्षसकुलं विकटमुकुटतटखचितरुचिरतरललितबल-मथनमणिघृणशबलितनिजदिव्यविग्रहकान्तिं भगवन्तं प्रणतसरसिजजनिपुरहरं नरहरि निजकुलदैवतं भावितहर्षोत्कर्षप्रसृमरपुलकोद्गमो विलोक्य नयनयोर्महोत्सववितरणेन सम्पादितानृण्यः पुण्यकर्मणामग्रगण्य इत्थमभितुष्टाव।।3।।

पद्यम् -

स्फूर्जत्पर्जन्यगर्जाप्रसरणरभसोतर्जनात्यूर्जितैः स्वै-
रुत्कृष्टैरट्टहासैर्दिशिदिशि चलितैः साध्वसं साध्वनन्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

चक्रे शक्रेशमुख्या दितिसुतनिकरस्यापि सोऽयं कथं वा
शश्वद्विश्वप्रपञ्चाभयद इति भवान् गीयते गेयतेजाः।।12।।

त्वं स्तम्भभेदपूर्वकमुदितो भजतां समस्तमनुजानाम्।
प्रह्लादजीवनौषध विरचयसि स्तम्भभेदनं युक्तम्।।13।।

यदि च निवसेत्प्रह्लादस्यापरः सदृशः सुतो
भवति हि तदानिष्पेषेस्य प्रमोदभरो महान्।
इति मृगयितुं नूनं शत्रोर्बिभेद भवान् हरे
जठरमचिरान्नोचेद्रोषानलस्य कियान् स ते।।14।।

तादृशरोषेऽपि हरे लक्ष्मीदर्शनलवात्प्रसन्नोऽसि।
अतिचण्डोऽपि धरित्र्यां जायानिकटे प्रसन्न एव जनः।।15।।

एवं स्तुवन्स्वकुलदैवतमात्मवंश्य-
राजर्षिभिः शुभगुणैर्दृढभक्तिक्लृप्ताः।
गृह्णानमेष कृपया सकलाः सपर्या-
पर्यायतः कमपि मोदमथादुदार।।16।।

गद्यम् –

तदनु हृदयान्तरुज्जृम्भमाणकुतूहलनिराकरणोनिशोवनीशः पुनरप्येष मम भागधेयमेष मम नयनानन्दकन्द एष ममासंस्पृष्टव्यामोहः पिता माता भ्राता एष मम चिरतरसुकृतसुरतरुफलमेष मम सकलमनोरथनिर्वहणबीजमेष परात्पर इति ध्यायं ध्यायं निमीलितनयनः पुनरपि प्रोत्फुल्ललोचनः पुरतः सिंहस्थितिर्मम दीप्तिकारणमिति हर्षादुपागत्य प्रकाशमानेन दिनकरेणेव रत्नमुकुटेन हिमाचलमिव भानुमण्डलेन परिमण्डितं निरर्गलविसृमरप्रताप-

प्रवाहमव्यावर्ताभ्यामिव सतरङ्गाभ्यां कुटिलतरभ्रूलतावृत्ताभ्यां वर्तुलापाटलाभ्यां नयनाभ्यां रिपुजनहृदयक्षेत्रेष्टं क्रूरयन्तं साध्वसबीजानि द्विजराजतामात्मनः स्फुटीकर्तुं वदनभागे द्वेधा जायमानेन बालचन्द्रेणेव दंष्ट्रायुगलेन कोरकितकरालवदनं मर्त्यसिंहमप्यमर्त्यसिंहं यावत्संसेव्यापर्याप्ताश्चर्यो भवति तावत्त्रियामोत्सवेषु निर्वर्तितेषु सर्वेषु यथामर्यादं शय्यासनार्पणाय सूत्रवतीसखो भगवन्तमित्थ्यमभितुष्टाव।।4।।

पद्यम् -

आसूर्योदयमम्बुजाक्षरचिता आरात्रि ये वा मया
देवेशप्रचुरोपचारकपटादद्यापचाराः शतम्।
तां स्वं माधव दैत्यबालवरद क्षाम्यन् कृपाभारतः
पाह्येनं त्वदुदारपादयुगलीनित्यप्रपन्नं जनम्।।17।।

इतश्च

सर्वे सज्जीक्रियान्तां मृगमदविलसच्चन्दनस्त्रक्प्रदीपा
धूपाः सौरभ्यगर्भा अविरलकुसुमाः सम्भ्रियन्तां च शय्याः।
दीप्यन्तां मञ्जुलारार्तिकवरनिचयाश्चन्द्रमुख्यः समन्ता-
द्भूयान्कालोतियातो भवति हरिरयं याति चैकान्तलीलाम्।।18।।

भोभोश्चण्डप्रचण्डौ शृणुतमिह वचो मामकीनं नितान्तं
भ्रान्तः कान्तो रमायाः कमपि जनमिह द्वारि मा मुञ्चतं वा।
शास्ति श्रीमर्त्यसिंहप्रभुरिति निखिलायात नैजान्निकेतान्-
देवा मर्त्याश्च नातः परमिह भगवानद्य सेवां प्रदत्ते।।19।।

 In Public domain. Digitization Muthulakshmi Research Academy

दिक्पाला इन्द्रमुख्या इह भुवनतले सर्वतो रक्षत श्री-
कान्तं नीरानृसिंहप्रभुमखिलजगद्रक्षकं पङ्कजाक्षम्।
शेते लक्ष्म्या सहासावधिकमवहिता यूयमेते प्रभाते
सेवार्थां यात नृणां सकरुणहृदया दर्शयध्वं यथावत्।।20।।

भो भो नारदतुम्बरुप्रभुतयः सर्वैरिदं श्रूयतां
मन्दं मन्दमुदञ्चयन्तु मधुरं गीतं भवन्तः पुरा।
वीणामात्रकलारवेण सहितं देवो मुदा भार्गवी-
हस्ताश्लिष्टकरो भजत्यतितरामेकान्तसेवां हरिः।।21।।

मन्दं वीजय चामरं सुविमले सानुग्रहेऽनुग्रहे
शीतं मञ्जुलतालवृन्तमनघं व्यालोलय त्वं मनाक्।
अत्युद्वेल्लितबाहुवल्लिविलसद्रत्नोल्लसत्किङ्किणी-
दीव्यत्सिञ्चितपुञ्जलो नरहरेर्निद्राविभङ्गो भवेत्।।22।।

इतश्च पुनः साञ्जलिबन्धं भगवन्तं प्रति।
स्वामिन् भजस्व रमणीयवितानशालि-
मल्लीसुमातिसुरभीकृतशुभ्रचेलम्।
मञ्चं नितान्तमृदुलं परितः प्रजाग्र-
द्बालाकरोल्लसितचामरचारुरूपम्।।23।।

अम्ब भार्गवि मर्त्यसिंहविभोर्महार्घपदाम्बुज-
द्वन्द्वसंवहनं मृदु प्रविधाय कोमलहस्ततः।
तत्र देवपदाम्बुजेर्पितसर्वपूजनसत्फला-
शेषमञ्जुलकोमलाम्बरमांसले शयनोत्तमे।।24।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं विष्वक्सेनवाक्यैः प्रहृष्टः
श्रीमान्यावद्धाति नीरानृसिंहः।
तावन्मदं मन्दमात्तापसर्वः
प्रायाद्भूपालोऽपि नैजोपकार्याम्।।25।।

अन्येद्युः।

रसालफलशङ्कया ग्रहणसंमुखीनैर्मिथः
प्रबुध्य कलहैर्झषैः प्रचुरपुच्छविच्छोटनात्।
महामणिरिवोदधेर्वियति दूरमुट्टङ्कितः
शुशोभ तरणिस्तदा समुदयन् बलारेर्दिशि।।26।।

कृतनिखिलाह्निकाः स्मृतबहुश्रुतिशास्त्रगणा-
भृतशुभभक्तयस्ततमहार्घगुणा निपुणाः।
नरहरिसन्निधेर्धुरिधृताञ्जलयः सुधियः
परिचरणानि तस्य परितः परितस्तरिरे।।27।।

प्रजिज्ञयंश्चैवम्।

श्रीदेवदेवकरुणाजलधे मुरारे
प्राभातिकाम्बुजमदापहनेत्रकान्ते।
नीरातटात्तनियतालरम्यमूर्ते
श्रीमन्नृसिंह भगवंस्तव सुप्रभातम्।।28।।

हरिर्हरिर्हरिरिति मञ्जुभाषितं
द्विजावलेः सपदि निशम्य कौतुकात्।

 In Public domain. Digitization Muthulakshmi Research Academy

द्विजव्रजोप्यनुवदतीव कूजितैः
कृपानिधेच्युत नृहरे प्रजागृहि।।29।।

अन्तर्हिता लसति धामनिधौ प्रकाश-
मत्यन्तमेत्य जनयञ्जगतां प्रबोधम्।
प्राचीप्रदेश इह देशिकवद्विभाति
नीरानृसिंह भगवंस्तव सुप्रभातम्।।30।।

गाढा विद्येव रात्रिर्विगलति न चिराज्ज्ञानवद्भानुतेजः
प्रोन्मीलत्यब्जबन्धुर्जलजयनयनवद्दक्पथं याति मन्दम्।
आनन्दं याति सान्द्रं मुनिवरकुलवद्देव सर्वं जगच्च
श्रीमन्नीरानृसिंह प्रभुवर नयने किञ्चिदुन्मीलयस्व।।31।।

काहलडिण्डिममण्डलझर्झरपणवाद्यहृद्यवाद्यानाम्।
संस्पर्धयेव निनदा जृम्भन्ते सुप्रभातमुच्यत ते।।32।।

इत्यभिष्टुत्यार्पितान्तैः सत्यधीभिः श्रियः पतिः।
पूजां यावत्सगृह्णाति राजा तावदगान्मुदा।।33।।

संसेव्य निर्जरगुणोत्तंसं दितिसूनुहिंसनं देवम्।
धन्यात्मावनिपालो निन्ये स सुखं दिनं तत्र।।34।।

श्रीशैलवंशतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः।
तार्तीयकं विलासं विदधे रघुनाथविजयेऽस्मिन्।।

इति कविकृष्णविरचितया रघुनाथविजयचम्प्वास्तृतीयो विलासः

चतुर्थो विलासः

पद्यम् -

कतिचन दिनानि तत्र क्षितिपालो व्युष्य हृष्यदनघमनाः।
अगणितविभवस्तस्मान्नगरात्प्रस्थानमतनुत बलेन।।1।।

अताड्यन्त दुन्दुभीनमर्दयन्त मर्दला-
ननादयन्त काहलानसज्जयन्त वारणान्।
अवल्गयन्त घोटकानधारयन्त खेटका-
नहेषयन्त सैन्धवांस्तदा मुदा जना घनाः।।2 ।।

बालं कञ्चन मामकान्वयमणिं बध्नाति चित्ते भवा-
न्नामाख्यं न हि मुञ्चसि क्षणमपि त्वं कस्य हेतोरिति।
प्रष्टुं किं समुपागतेव रविणा छत्रेण हैमात्मना
कान्तश्रीरधिरूढतुङ्गतुरगः श्रीपाण्डुरङ्गं ययौ।।3 ।।

उन्निद्राक्षैर्नितान्तं कृतपटुनटनै रुक्मिणीविठ्ठलेति
श्रीमन्नामोच्चरद्भिः कटिघटितपटैर्हस्तताल्प्रशस्तैः।
हस्ताग्रात्तप्रदीपैर्धुतदुरितचयैर्देवदिव्याङ्कपाली-
प्राप्त्या भक्तैः समन्तादपि निबिडतमं सन्ततं यत्समिन्धे।।4 ।।

प्राप्तोऽयं हृदयाम्बुजं चिरतपोभ्यासात्समुन्मीलना-
दीषल्लोचनयोर्गमिष्यति बहिर्लब्धाय नः श्रीपतिः।
इत्यामील्य दृढं विलोचनयुगं ध्यायन्ति यत्राच्युतं
सानन्दं मुनयो भवन्ति मनुजाः कृच्छ्रार्जिते सादराः।।5 ।।

In Public domain. Digitization Muthulakshmi Research Academy

यद्दीक्षालवलेशलेशकणिकालाभाज्जनाः केचन
स्वर्गेशानपि निर्भरं विद्धते भिक्षाककोटौ क्षणात्।
तां लक्ष्मीं विद्धद्वशेऽपि भगवान्यः पाण्डुरङ्गस्थलीं
त्यक्तुं जात्वपि नेच्छतीह बत तं राजा ददर्शाच्युतम्।।6 ।।

एवमस्तैषीत्साञ्जलिबन्धम्।

सायन्तनुकुवलयमदहरणचणस्निग्धमुग्धदिव्याङ्गम्।
ध्यायन्ति यं मुनीन्द्राः सोऽसौ साक्षात्कृतः सरोजाक्षः।।7 ।।

सपुलकाञ्जलिबन्धम्।

वेदान्ताभरणे श्रयामि चरणे ऊरू तथोरुश्रिया
बाहू चापि बहूज्ज्वलौ हृदि भजे वक्षश्च लक्ष्मीयुतम्।
वन्दे चन्दिरसुन्दरं च वदनं फालं च कस्तूरिका-
नीलं कुन्तलजालचुम्बितकनन्मूलं च मौलिं भजे।।8 ।।

अपि च ।

वृत्तिरसङ्गतिरिव तव भगवन् सर्वार्थदानहेतोस्ते।
अवतारस्तदपि त्वं न कदाचित्त्यजसि पाण्डुरङ्गमपि।।9 ।।

देवेश चन्द्रभागाश्रितो विधुश्चासि तदपि यद्भगवन्।
श्रीपुण्डरीकवरदाभिख्यां वहसे तदेतदतिचित्रम्।।10 ।।

अन्यच्च।

तस्वानर्घं तप इह चिरात् प्रार्थितं यन्मुनीन्द्रै
रुक्मिण्या अप्यसुलभतमं दिव्यमालिङ्गनं ते।

धन्या एतेऽनुदिनमपि तत्प्राप्य हर्षं भजन्ते
मालापिष्टातककरतलाः किं ब्रुवे धन्यतां ताम्।।11।।

कथयन्ति विठ्ठलविभोरात्मज इति मां ममावनभरोऽपि।
न स्यात्कथं तव हरे तनुजं को वा न पालयेल्लोके।।12।।

किं बहुना।

नित्यं भक्तजनावनेन च नृणामालिङ्गनैस्तादृशै-
र्लक्ष्मीकान्त निपीडितोऽसि न यदि त्वं पाण्डुरङ्ग प्रभो।
कट्यां न्यस्तकरः सदापि कुरुषे संवाहनं हा कुतः
पाह्यस्मानपि ते विचारयति कः श्रान्तिं कथं वाप्यसे।।13।।

गद्यम् –

इत्याभिष्टुत्य गृहीतवत्प्रसाद उषित्वा तत्र दिनानि कानिचित्तावत् समुदयति घनतरोष्मयुवकामिनीकुचकनककलशपरिरम्भसंभ्रमसमात्तधैर्य-तरुणसमुदये हेमन्तसमये स्वाधिकतरागस्त्यमहामुनिमहामहभरावधूततयेव मन्दीभूततेजस्याश्रितदाक्षिणायने तीक्ष्णभानौ शीतकरायमाणे धामनिधि-मण्डलविधुरायां नितान्तरतान्तपरिश्रान्तिजनितघर्मजलनिर्मृष्टतिलकायामिवा-न्भ्रलललनायां दिशायां धनदगोपायितायां दुःसाध्यतरमानिनीमानमहापिशाच-दूरोच्चाटनहेमन्तमान्त्रिकमन्दानिलफूत्कृतोट्टङ्कितविभूतिभ्रमावहहिमानीसमानीत धूसरिमभारे दशदिशाभ्यन्तरे निर्भरविजृम्भमाणयौवनोष्मनिजस्तनयुगला-विरलाश्लेषदूरीकृतहिमोद्वेगसरागहृदयतरुणकामुकनिकरसविशेषदष्टरदनवसनद लास्वपि प्रालेयशीकरनिकरस्फीतमारुतव्रणिताधराणां जनानां वचनीयता-मनुपगतासु मुग्धवनितासु अजातनिर्मलहर्म्याग्रभागशयनमनुद्घटितगवाक्ष-

In Public domain. Digitization Muthulakshmi Research Academy

मघनसारचन्दनचर्चनमकुसुमहारोपहारमलामज्जिकतालवृन्तवीजनं केवल-कस्तूरीचन्दनलेपनमतिमात्रताम्बूलचर्वणं राङ्कवैकवसनं गाढालिङ्गनमात्रसार-मनुभवन्तीषु सर्वरात्रं कामिनीषु कामुकैः सह रतोत्सवमेवमतिक्रान्तेषु तद्दतुदिनेषु विसृज्य तां नगरीमवाप्य कोलापुरीं तत्र भागधेयं भगवतो नारायणस्य भगवन्निवासकृतार्थमस्म्यधुना तद्धर्मदाराणामपि निलयीभूय सेवया कृतार्थयामि जन्मेति निश्चित्य दलात्मना परिणतेन किरणसहश्रेणिदेदीप्यमाने चण्डकरमण्डल इव सुवर्णसहस्रपत्रे समासीनां शरणागतजनहृदयादपहृतं रागातिरेकमिव प्रकाशयद्भ्याम् अरुणारुणाभ्यां चरणाभ्यामुद्भासमानां जननीस्नेहदर्शनकुतूहलपरिरम्भमाणविबुधतरङ्गिणीसंशयधत्तहस्तदुकूलभूषिता ङ्गी दिव्यविग्रहलावण्यमन्दाकिनीमध्याशीर्षनिमग्नयौवनैरावतकुम्भाभ्यामिवो-र्ध्वप्रकाशमानाभ्यां कुचाभ्यां प्रकटितोत्तमस्त्रीलक्षणां निजमहिमान-मनुकुर्वद्भ्यामिव श्रुत्यन्तप्रणयिभ्यां नयनाभ्यामानन्दितमुकुन्दहृदयां निजान्तेवासिनः प्रति दयालुं कारयितुं समाश्रयता शुक्रेणेव वज्रतिलकेन विभासुरफालतलां पुरस्थितनासाचम्पकसौरभीचकिततया पश्चाद्धावमानया यौवनाराममधुकरमालिकयेव वेणीलतया परिष्कृतां भगवतीं भवाब्धिनौकां राकाशशिवदनां कुन्दकुङ्मलरदनां जगज्जननीमनीनयदक्षिपथम्।1।।

पद्यम् -

अथ नुतिवाक्समार्जितनिरङ्कुशतत्करुण-
पुरमपि तद्विसृज्य नगराणि नदीश्च गिरीन्।
कतिपयवासरैरतिपतन् द्विरदैस्तुरगैः
सह पथि कृष्णवेण्याभिधशैवलिनीमभजत्।।14।।

In Public domain. Digitization Muthulakshmi Research Academy

दत्तात्रेयं सोऽभिवाद्याथ तत्र
श्रीमांस्तीर्त्वा धूतकृष्णां च कृष्णाम्।
सूर्यासक्तां तां सदामन्दसेव्यां
छायाभिख्यां देवतामैक्षतासौ।।15।।

महाभाचारकुशलद्विजराजनिषेवितम्।
कनकाचलनामानं ग्रामं भेजे ततो नृपः।।16।।

सुरालय इति प्रथां भगवदाश्रयादात्मनो
व्यपोहितुमना निजाकृतिमपोह्य लताभरात्।
पुराकृतिमुपादधे धरणिसीम्नि मेरुर्न चे-
त्कुतोऽस्य विदिता भवेत्कनकगिर्याभिख्या पुरः।।17।।

गद्यम् –

तत्र च भगवन्तमखिलजगदुत्पत्तिस्थितिविलयकारणं दुस्तरभव-जलनिधिमहावर्तपरिवर्तनविवशार्तजनदूरार्तिलताकर्तनप्रहरणं प्रणमदमर-परिवृढमुकुटतटलुठदरुणाम्बुजप्रतिस्पर्द्धिचरणं त्यक्तबहुचित्तभववृत्तिपटुभक्ति-रससिक्तनिजचित्तभवमुक्तजनमनस्सौधनिराबाधविहरणं महस्ततिनिस्तुल-रमास्तनस्तबकवास्तव्यकस्तूरिकामोदप्रशस्तिसौवस्तिककौस्तुभाभरणं रमा-लोचनचकोरहरिणकिरणं क्षमाचित्तसरोजषड्चरणं नीलाविलासविहरणशरणं शरणागतजनभरणायत्तकरुणं कनकगिरिपुरसरसिजारुणं निखिलमुनिजन-परायणं नारायणमवलम्बितनृसिंहरूपमगणितमहापमिमाटोपं संसेव्यबहुतरं स्वायत्तीकृततदनुग्रहः निर्गत्य तस्मात्पुरादतिलङ्घ्य विरचितनिखिलजनतुङ्गभद्रां तुङ्गभद्रामतिक्रम्य गव्यूतिद्वयमात्रं मार्गं चण्डचण्डपुण्ड्रेक्षुकोदण्डभुजदण्ड-

In Public domain. Digitization Muthulakshmi Research Academy

हिण्डमानकोदण्डमण्डलीसमीरितनिशितमुखशिलीमुखविकलीकृततरुणमिथुन कलितविविधलीलालालितमञ्जुनिकुञ्जपुञ्जरञ्जितोपान्तवनिकावनिकान्तकान्तिनि तान्तनिरन्तरकन्दलितसन्तानसन्तानसरलबकुलक्रमुकमुखविविधविटपिचटुल विटपपटलाञ्चलचञ्चलचञ्चरीकसञ्चयसञ्चलितमञ्जरीजरीजृम्भदमन्दमकरन्दबि न्दुसन्दोहसन्ततविहरमाणशुककोकिलमुखविहगकुलत्रोटीपुटकोटीकुट्टनपरिपा टीपाटितनारिकेलरसालमुखविशालतररसालफलजालनीरन्ध्रनिष्यन्दमानसरस तररसधासासाराम्रेडितमाधुर्यगाम्भीर्यमङ्गलतरतरङ्गतुङ्गभद्रान्तरपरस्परपरिर म्भारम्भजृम्भितसारसलक्ष्मणापक्षविक्षोभदरविदलदविरलदशशतदलमुकुलगर्भ निर्भादाविर्भवन्निर्भरसौरभकरम्बितमन्दानिलसेवापरवशयुवजननिबिडान्तरं त्रैलोक्यपावनतुङ्गभद्रान्तरङ्गनिमज्जनकुतुकावतीर्णसुरनिकरतटभूस्थापितासमान लसमानविमानसंशयाशंसिदेवालयशतकोटिसहस्रनिबिडितं प्रविश्य हेमकूट-गिरितटघटितवसतिविरूपाक्षक्षेत्रं नाम किञ्चन पवित्रं स्थानं तत्र दिव्यालय-मध्यभुवि परमेश्वरनित्यनिवाससौभाग्यकलितमदविलासकैलासवैशिष्ट्याक्षम-तया तत्सादृश्यावलम्बनाय समागतमिव सुमेरुगिरिमुत्तुङ्गकनकपीठमधिवसन्तं गिरिराजतनुजायामपि तत्प्रीतिरधिकेति रुषा जटाजूटाटवीमध्यमावसन्ती-सिद्धस्रवन्तीमाश्वासयितुं त्वमेकैव मम प्रियेत्यात्मना घटिकाखण्ड-लिखितामिवैकत्वबोधकान्ध्रवर्णरेखां सितकररेखामुत्तंसयन्तं किरीटतटलुठदम-रतटिनीतटसमुन्मीलितलताप्रतानेनेव जटाजूटेन कामपि कान्तिं बिभ्राणमदभ्रां शिरसि नामितोनेनेन्दीवरबन्धुस्तनन्धय इतीर्ष्यया तत्सादृश्याश्रयणाय तन्निकटजायमानेन बालसूर्येणेव तेजोमयेन निटिललोचनेन कल्पितानल्पाकल्पं बलरिपुमणिनदविधुतिनिपुणनीलकण्टतया लालयति नित्यं

In Public domain. Digitization Muthulakshmi Research Academy

प्रियतमा मम सखीं शिरसा स्वरङ्गणतरङ्गीणीमप्यस्य प्रिया भवामीति कण्टाश्लेषमातन्वन्त्या कालिन्द्येव कवलितं विरञ्चिपञ्चायुधपञ्चाननास्त्रयो वयमिह त्रिजगत्प्रख्यातवैभवा इति सूचनायेव त्रिशूलं दधानं विधानं निखिलसम्पादां जटाजूटघटितस्य निजाधिनाथस्य कलानाथस्य कार्श्यं वीक्ष्यश्रियान्तराभावकातर्यप्रपन्नमैन्दवमिव कञ्चन कुरङ्गबालकं कालयन्तं करतलेन समाश्लिष्टं गौर्या विद्युतेव शारदाभ्रं मुञ्चास्मद्वल्लभं कुतो बध्नासि कपर्द इति प्रार्थयितुमुपागताभिस्तारावलीभिरिव मुक्ताहारावलीभिरलङ्कृतं चन्द्रिकयेव परिपूर्णचन्द्रं हिमान्येव हिमवन्तमात्मोद्धूतस्फटिककान्त्यैव रजताचलम् इन्द्रवज्रप्रभयेवैरावतं विभूत्या समुद्धूलितविग्रहं विरचितकुसुमायुधनिग्रहं दक्षाध्वरध्वंसदक्षं विरूपाक्षं चिरतरमभिवीक्ष्य प्रणम्य प्रणम्यानन्दसिन्धुजल-मानुषायमाणमानसोऽभुत्।।2।।

पद्यम् -

निशम्य तत्रैत्य जनेन वर्णितां सहस्तिकोणाख्यपुरस्य रम्यताम्।
तत्रैव तप्तुं तप आत्तकौतुको विनिर्ययौ श्रीरघुनाथभूपतिः।।18 ।।

अविदूरे च क्षेत्रस्य तस्य चक्रतीर्थपरिसरे।

सुन्दासुरेन्द्रसुतसन्दारणस्फुरदमन्दाग्रदोर्बलवरं
सन्दानितत्रिदशवृन्दाग्र्यपङ्क्तिमुखनिन्दावहस्वचरितम्।
वन्दारुकाग्रसरवृन्दारकेशसुरवृन्दानतिक्षणगल-
न्मन्दारकल्पवरकुन्दादिसस्तुममरन्दाभिषिक्तरचणम्।।19 ।।

आतारकधूतानघभूताधिपचापं
सूतादिमगीताद्भुताद्भुतपूतात्मचरित्रम्।

In Public domain. Digitization Muthulakshmi Research Academy

भीताखिलभूताभयदातारमजस्त्रं

सीतापरिणेतारमुदीताद्भुतहर्षम्।।20 ।।

वीरं सुकुमारं जितमारं निजलक्ष्म्या-

धीरं गुणनीरन्ध्रमुदारं क्षितिपालः।

कामं सुरसामन्तविभीमं प्रमदात्तं

भूमण्डलसोमं धुरि रामं स ददर्श।।21 ।।

दशरथगृहदुग्धाब्धौ यस्मिंश्चन्द्रे कृतोदये जगति।

कुमुदानन्दः शान्तश्चित्रं निशिचरभयं च सञ्जातम्।।22 ।।

वृषधर्षणानुकूला बभौ यदीषा समुद्धृतापङ्कात्।

सीतानुषक्तमनसा येनानघकर्षकेण साऽहल्या।।23 ।।

निजचरितानीव मुहुर्बहुतेजस्सोमरहितानि।

युद्धानि यस्य तद्वद्यच्छत्रुखरादियातुवदनानि।।24 ।।

तिष्ठायाति दशाननोद्य भवता प्रोक्तं तथैवास्तु ते

देवानां प्रिय युक्तमेतदपि मे नालुक्समासं पदम्।

तूर्णं दर्शय मे त्वसारमथ तां या लक्ष्मणेन क्षणा-

द्विग्राभूदिति रावणोक्तमखिलं योऽखण्डयद्वाग्भरैः।।25 ।।

लङ्का विभीषणेनाधिगता यदनुग्रहेण तज्ज्यायान्।

विपरीतवर्णलङ्कावाच्यं यस्याग्रहेण समवाप।।26 ।।

श्रीमानशेषभुवनत्रेता नेता विदेहतनुजायाः।

मङ्गलमुत्तुङ्गतरं तरङ्गयतु नः कृपानिधी रामः।।27 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्यभुष्टुत्य नृपतिः प्रत्यर्प्यास्मै समर्हणाः।
यन्त्रोद्धारकनामानं मानयामास मारुतिम्।।28।।

लङ्कालङ्कृतिसीम्नि दैवतचमूद्द्वारणे तोरणे
यः श्रीमान्पृतनापतन्नगमयत्पञ्चापि यत्पञ्चताम्।
तद्युक्तं खलु राक्षसानपि तथा सत्यापि सत्यार्चिषा
तुल्यान् द्रागतनोदिदं बत तयाशीतिस्सहस्राण्यपि।।29।।

श्रीमन्नवदुर्गस्थः कृष्णः कविसार्वभौमबिरुदाढ्यः।
तुर्यविलासं विदधे जवेन रघुनाथविजयेऽस्मिन्।।

इति कविकृष्णविरचिताया रघुनाथविजयचम्प्वाश्चतुर्थो विलासः।।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमो विलासः

गद्यम् –

तदनु प्रणम्य तं लोकोत्तरतदीयसौन्दर्यसन्दर्शनकन्दलितानन्दो रघुनाथधरामहेन्द्रः किञ्चिदन्तरमीशानोपासनासक्तस्य ममैतदुचितमतीव तद्दिशाभिमुखमुपसृत्य सर्वोत्तरतपःसिद्धये समाश्रयितव्या तादृश्येव दिशेतीवोत्तराभिमुखमुच्चलन् नितान्तसमुन्मिषद्वसन्तकालगमोद्वेल्लदेलाल-वङ्गतरुमालासुपुष्यद्रसालावलीनक्तमालाग्रदीव्यत्तमालातिपल्लवितपालाशभूमि रुहजालामिताशोकसालालिमेदुरतमेलाद्भुतोपवनमालासमुन्मिषितदोलाविशेष शुभलीलाविनोदभरलोलान्तरङ्गघननीलालकौघपुरबालामणीमधुरतालालिवी णाकलालापमूर्छनद्रवीभूतसन्निहितकलाधरणिशिलासमुदयतलामितोदितविमल विमलाम्बुनिर्झरपरिमेलनद्विस्त्रिरुक्तधवलिमनिजभङ्गभद्रां तुङ्गभद्रां सघुर्घुराव-मुत्तानकर्णयुगलमुत्तम्भितग्रीवं प्रतीरैकदत्तदृष्टितीर्णेषु तुरङ्गमेषु सफूत्कारं कराग्रसमुत्कीर्णशीकरनिकरं मन्दं मन्दवरसुशास्ततरेषु हस्तिवरेषु सन्तीर्य स्वयमप्युत्तरतटे विद्यानगरकरिकोणपुरपर्यायनामधेयां समृद्धसर्वापणानुबन्धां प्रविनयं किष्किन्धां सत्यसन्धो वसुन्धराधुरन्धरोऽयं प्रत्युद्गतस्तत्र समेधमानै राजवंश्यजनैर्निखिलजगच्छ्लाघ्यरामणीयकं तत्र क्वचन तुङ्गभद्रातरङ्गमन्दानिल-दत्तसपर्याविशेषं कलिततोषं चिन्तामणीश्वरक्षेत्रापरनामधेयं कपिलाश्रमं नाम प्रदेशं विविधदेवालयनिबिडितसदेशं प्रविश्य विलोकयन् कमलपालिकामधुर-मधूलिकापानकेलिकामुदितभं भरततिजम्भितझङ्कृतिवाचालतया निराबाध-विहरमाणमहामत्स्यपुच्छविघट्टनचलाचलकह्लारतया च सचाटुवचनं सशिरःकम्पं सन्निहितचिन्तामणिक्षेत्ररामणीयकं श्लाघमानाभिरिव

In Public domain. Digitization Muthulakshmi Research Academy

सौगन्धिकलताभिरभिशोभितां प्रथितभङ्गमुद्रामप्यप्रथितभङ्गमद्रा तुङ्गभद्रां न पुराय न राष्ट्राय न परिजनेभ्यो न बान्धवेभ्यः स्पृहयांबभूव चन्द्रशेखरसपर्या-चर्यादत्तचित्तसंवर्द्धिततुलसीकुसुमारामः सगुणाभिरामः सरामोनयन्वसन्त-समभं विविधशुकपिककुसुमोदन्तमयम्।।1।।

पद्यम् -

मौनव्रतप्रदाता वनप्रियेभ्यः सदेदमुचितमिति।
उदयाय तपःकालस्त्वरयन्निव तमेनमवनिपतिम्।।1।।

तापोधिके स्वरकरस्य मरुत्प्रचार-
वार्तालवेन रहितेषु दिगन्तरेषु।
श्रान्ता अनूरुगमितास्तुरगा बभूवु-
र्भानोस्ततोहरजनिष्ट नितान्तदीर्घम्।।2 ।।

शुचिरेष नृपालमखिलस्तपस्यतीत्यात्ततदवलोकास्थः।
कलिततपःशुचिरिति भुवि मासः ख्यातः तमभ्युदायिष्ट।।3 ।।

किष्किन्धादिमरभ्यदेशविभवो नासीन्मया लोकितो
द्रष्टव्योह्यधुनेति जातकुतकां संलालयज्ञानकीम्।
प्राप्तश्री रघुनाथ एष चतुरो मासान्वसेद्भूपतिः
साम्राज्यं कलयन् मुदात्र पुर इत्यासीप्रवादो नृणाम्।।4 ।।

शुचिमासे शुचिपक्षे शुचिचरितो धरणिपालवर्योऽयम्।
शुचिकिरणशेखरं हरमुपासितुमपक्रमं व्यधाद्युक्तम्।।5 ।।

In Public domain. Digitization Muthulakshmi Research Academy

विरचितनियमो राजा विरजोम्बरभूषणो जिगाय तदा।
भूम्युद्गतनिबिडरजः कलुषाम्बरभूषणं स राजानम्।।6 ।।

एकादश्यां नियमादुपासितुं चन्द्रशेखरं नमयन्।
उपचक्रमे विजानन् युक्तं तद्रूपसङ्ख्यदिनमेतदिति।।7 ।।

स्रवन्ति मय्यात्तनिमज्जनानामेवं हि पापान्यखिलान्यपीति।
निदर्शयन्त्यामिव तुङ्गभद्राभिधस्रवन्त्यां नियमात्स सस्नौ।।8 ।।

रचिताह्निकः स राजा मौनान्वयमात्मनः स्फुटीकर्तुम्।
मौनान्वयकलितश्चिरमजपत्पञ्चाक्षरीति दिव्यमनुम्।।9 ।।

स्मारयति त्र्यम्बकमिह सैषामियं च तद्ध्याने।
द्रष्टव्येतीव विभुः स नासिकाग्रे दधौ दृष्टिम्।।10 ।।

गद्यम् –

चिरमेव विधाय सुधाकरशेखरचरणनलिनध्यानमाराध्य तं विरचितमहासंहितादिपरायणः निर्वर्तितमध्याह्निक उपात्ततुलसीकुसुमसम्भारः कल्पितनियमाप्लवः परिचिततात्कालिकजपकृत्यः कृत्यविदामग्रणीरग्रतश्चन्द्रशेखरसपर्यायामेकेन वपुषा पर्याप्तिममन्यमानतया निजकिरणसङ्ख्याकानि वपूंषि स्वीकृत्य समागतेन सहस्रभानुनेव बहुधतरखचितपात्रनिकुरुम्बेण रमणीयपुरोभागं रत्नपीठमधिवसन्तं रघुनाथमहाराजमनुगृहीतं धरणीतलमवतीर्णमात्मानमभ्यर्हयितुं रजतधरणिधरेण प्रेषितमिव स्वकिशोरकं निजाधिनाथचन्द्रशेखरसारूप्यावलिलम्बयिषयेव शिरोभागन्यस्तेनार्धचन्द्रेणेव शेखरितं श्रृङ्गद्वयेन अष्टमूर्तिपदाग्रपरिचरणधुरीणतामात्मनः स्फुटीकर्तुमिव प्रत्येकं

In Public domain. Digitization Muthulakshmi Research Academy

खुरद्वयकलितैश्चतुर्भिः पदैः रमणीयं स्फिग्देशालवालनिरङ्कुशोज्जृम्भितान्तःसत्वविशेषलताशङ्काकरेण स्वच्छेन पुच्छेन मनोहरं वृषवरं निखिलजगदानन्दिनं नन्दिनमधिष्ठितोनिजशेखरशशिकरलक्ष्मीदर्शनासहनमेतदिति रोषादात्मनाथीकृतस्येव तामरस्य हेममयस्य कर्णिकामलङ्कुर्वाणं निर्वाणदाननिपुणं गीर्वाणपरिवृढविनुतगुणं राजहंसमिव मानसतामरसमनोहरं मया किलायं कृतचूडामणिः परमेश्वर इति सञ्जातमदावष्टम्भे कुमुदबान्धवडिम्भे तद्गर्वनिर्वापणाय स्वयमेव परिपूर्णचन्द्ररूपमिवाश्रयन्तं चिरन्तनं सरस्वतीमुकुटाग्रभूषणमहावज्रमणिमिव विद्योतमानं लिङ्गाकृतिं सान्द्रधीकरं चन्द्रशेखरं नयनेन्दीवरानन्ददं विरचय्याभ्यर्च्य विविधोपचारैरनुदिनमपि वरुणदिगङ्गनानान्तःपुरान्तरचारिणि पूषण्याचरितसायन्तननियमोभ्यवहरन्नियमवशाद्भव्यभव्यमेव दिव्यमन्नमनुदिनमपि निजाभ्यर्थनया प्रवर्तते सत्रमुखे दत्तसुखे निबद्धकटितटैरास्तीर्णपर्णैर्न्यस्यमानपत्रामत्रैरप्रमादैः सप्रमोदैर्विप्रसूदैः कृतेषु करिष्यमाणेषु क्रियमाणेषु समस्तवस्तुपरिवेषणेषु इतोपि किञ्चिदधिकं परिवेष्यतां घृतं किं त्वयोपार्जितं नश्यति वा त्वत्पित्रार्जितं भ्रश्यति वा आनीयतां सूपो यथेष्टं वयमप्यौत्तराहा न दाक्षिणात्या इति जल्पत्सु केषुचित्सादरं कृतयुगपदापोशनेषु सर्वेषु मतत्रितयप्रवृत्तेषु शुभवृत्तेषु द्विजवरेषु कोटिशः सन्धीभूतान् भोजनकृते द्विजराजान् विलोक्य द्विजराजनामधेयमात्रजनितचापलस्तत्तादृशतत्रत्यभक्ष्यभोज्यलेह्यचोष्यादिवस्तुकोटिरसश्लाघनमेकेन मया कर्तुमशक्यमित्यसङ्ख्यरूपाण्यालब्ध्य समागतोऽयं सुधाकर एव शर्करालड्डुकाव्याजेन आहोस्विद्भूसुराणामपि सुधास्वादानन्दं सम्पादयितुं रघुनाथभूपाले विरचितानुग्रहेण निवासक्षेत्रकलितनियतनिवासेन मोहिनीरूपेण

 In Public domain. Digitization Muthulakshmi Research Academy

भगवता प्रेरिताः स्युरमृतकलशा न चेदमीषां क्व तावदीदृशी माधुरीति स्वच्छन्दं श्लाघमानेषु केषुचित्सुगुणोऽसि त्वं भह्यं यथामनोरथं विश्राणय खण्डलड्डूकानीति कुशले पृच्छति कस्मिंश्चिदाजन्ममनवलोकितैकाक्षरशिरस्कतया सूदूपर्याय-नामधेयमिति गुणशब्दमजानता तावतैव प्रमोदोच्छूनभुजेनौदनिकेन सादरं यथेष्टं तस्मै दीयमानेषु नैकविद्धमृद्वीकाखर्जूरखण्डशर्कराप्रचुरेषु विविधभक्ष्येषु नवनीतं गेहीति पृच्छत्यज्ञे कस्मिंश्चिदिदं नवनीतमेवोष्णतरं वर्तते न हि पुरानीतं स्वाद्यतामिति पायसप्रदानेनान्यथयति तद्याञ्चां कस्मिंश्चन धूर्ते दयालुना राजनिग्रहभीतेन केनचिदानीय दत्तं नवनीतं शर्करामसृणितमेलासुरभित-मास्वादयति तस्मिन्निमे दाधिका एते चूर्लिनोपूपा एते लवणा इमे मौद्गा इमे शर्करा इति न्यस्य गच्छत्सु सूदेषु भक्ष्याणि प्राज्यदध्याज्यदुग्धनदी-मातृकायमाणेषु चिन्तामण्याश्रमपरिसरेषु जग्धार्धकवलोनजग्धकवलांश्चर्वित-मनोहराननाघ्रातमोदकानस्मृतचिञ्चान्नानपेक्ष्यमाणाज्यान् काम्यमानलड्डूकान् परिमृश्यमानजठरभाण्डान् क्रियमाणसुरभिलेजलपानानाद्रियमाणसुगन्धि-तक्रान् स्तूयमानभक्ष्यरुचीन् पठ्यमानभोजगद्यान् स्वस्त्यस्तु राज्ञे रघुनाथाय न वयं निजनिकेतनानि स्पृहयामहे तिष्ठन्तु कूपकूर्मा इवानुदितकुतूहला जना गृहेष्वेव न वयं तथा पश्चादेतस्य गन्तव्यमेवास्माभिरिति कोटिशः कृतप्रशंसान् सुहितहृदयान् दर्शं दर्शं दृष्टहृष्टान्तरङ्गो मन्दमन्दमितश्चन्दनमितः पुष्पसरा इतः पटवासक इतश्चन्दनतैलमितः पुष्कलकसीमगन्ध इतोक्षता इतो दक्षिणा इतः ताम्बूलानीतः शुक्लाम्बराणीतो राङ्कवाणीति वदत्सु परिजनेषु तद्विरचिता आशिषस्साक्षता सङ्गृह्णानः क्षणं तत्कथालापदत्तान्तरङ्गो निषसाद।2।।

पद्यम् -

चिन्तामणाविवास्मिन्वितरति सर्वार्थमागतार्थिभ्यः।
चिन्तामण्याश्रम इति सार्थं तस्य स्थलस्य नामासीत्।।11।।

तत्र कवय एनमित्थमस्तुवन्। तत्र कश्चित्।

प्रदर्शयति राङ्कवं प्रथमतः स राजांशुकैः
प्रमोदयति नूनथापहरते स्वदत्तां श्रियम्।
न दर्शयति कञ्चिदप्यथ ददाति चेच्छाधिकं
न चाहरति सच्छ्रियं बत स एष राजापरः।।12।।

इतरत्र।

भवान्निष्कपटो दाता वयं निष्कपटार्थिनः।
दातृप्रतिगृहीतॄणां समा रीतिरहो इयम्।।13 ।।

अपरत्र।

दर्पश्चेन्न दया दया यदि भवेन्नौदार्यमेतच्च चे-
न्नैव स्यात्सरसत्वमेतदपि चेन्नो सत्यसन्धा भवेत्।
सर्वत्रापि जने समग्रसुगुणं न त्वादृशं कञ्चन
श्रीविञ्चूरधिनाथशेखरमणे कुत्रापि नेक्षामहे।।14 ।।

अन्यत्र।

कामः सुन्दर इत्ययं विजयते लोकप्रवादो महान्
किं तेनास्ति यदि क्षितौ प्रकटितं तत्सुन्दरत्वं भवेत्।
तेनानङ्गतया जितं सुललितं लोकस्य संमोहनं
रूपं श्रीरघुनाथभूपतिमणावन्यादृशं बिभ्रति।।15 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इतरत्र।

यस्त्वं पटं घटयसे विदुषामिह साम्प्रतम्।
नैय्यायिकाश्चिरित्रं ते चित्रमाहुस्ततो नृप।।16 ।।

अन्यस्तावत्कवीन्द्रो रत्नावल्या स्तौति।

निर्विष्कम्भमिहादधासि कविषु प्रीतिं त्वयायुष्मता
सौभाग्यं बहुशोभनं च दधता स्थेयं रिपूणां तव।
नित्यं स्यादतिगण्ड एव यदभूः श्रीमान्सुकर्मा भवां-
स्तत्ताद्दग्धृतिमान् दृढं ध्रुवमितस्त्वं शूलपाण्यर्चने।।17 ।।

सम्पत्तिं भजतां त्वदीक्षणवशात्समुस्मेरगण्डाननां
वृद्धिं प्राप्य वधूर्ध्रुवं तव जगत्प्रीतिप्रदा जानकी।
निर्व्याघातबुधालिहर्षणविभो वज्राढ्यभूषाञ्चितां
संसिद्धिव्यतिपातलेशरहितां सर्वत्र सम्पादय।।18 ।।

वरीयांस्त्वं नित्यं परिवनिभबाहुः शिवतमः
प्रसिद्धः साध्यं ते किमिह शुभमन्यद्विजयते।
समिन्धे शुक्लं ते यश इह हि सद्ब्रह्मनिरत-
स्त्वमैन्द्रश्रीर्भूयाश्चिरमसुहृदां वै धृतिहरः।।19 ।।

अन्यस्तावत्।

श्रीविठ्ठलेन्द्रवरपुत्र भवन्महार्घ
दानाम्बुभिर्भवति सन्ततमूर्वरा भूः।
नो चेदनेन कटुगर्जितभीकरेण
मेघेन हन्त विषदेन भुवः किमु स्यात्।।20 ।।

गद्यम् –

अथ यथाक्रममेव हरिततरकदलिकापत्रमरकतसिंहासमनाधिरूढेन शोणोल्लीढवज्रेरेखास्मेरया घृतधारया सह धर्मचर्यापरिरब्धेन निजगुणानुरूपेण सुवर्णरूपेण शमिततापेन सूपेन सचिवेन जनितजगदानन्दकन्दसरसतर-खण्डकूष्माण्डदुर्वारसोर्वारुकफलविविधरसमूर्तवार्ताकतोषितजनजिह्वापटलपटोलाशाकुटकालशाकुटशाकैर्माहामात्रै रसैः षड्भिर्गुणैः सुन्दरतरमाकन्दादिफल-वृन्दैः सेनाधिनाथैः सहकारामलकार्द्रकमयेनोपदंशेन शक्तित्रयेणातिरसैरतिरसै-र्मनोहरैर्मनोहरैर्निखिलजगन्मोदकैर्मोदकैः संवर्धितजनहेलिकाभिर्होलिकाभिरु-ज्जृम्भितरसाटोपैर्लड्डुकापूपैः परिजनैः परिवृतेन समृद्धदुग्धपक्वधवलतरगोधूम-पिष्टपरिकल्पितानल्पमृणालतन्तुसच्छात्रसेवाभिधभक्ष्यचामरसेवितेन माधुर्य-दयान्वितेनाखण्डमण्डदधिखण्डवज्राभरणभूषितेन मारान्तकसीरायुधहीरानघ-दीप्तिदोरावहधीरेण क्षीरेणाभिषिक्तेन पिप्पलाभिधानधवलातपत्रपरिष्कृतोर्ध्व-भागेन महाभागेन जगदुज्जीवनेन समृष्टशाल्योदवमहाराजेनात्मनेव तोषितीन् विरचितग्रन्थान् कल्पितचित्रबन्धान् कविताधुरन्धरान् सर्वविद्याहृद्यांश्च विपीन् बहुमान्य यथोचितं थलथलदनुपममणिसरावसरमुखनिखिलभूषणकनकमय-दशमृगतनूरुहवसनधवलपट्यंशुकादिभिस्तत्प्रदत्ताशीः प्रादुर्भूतायां च क्रोधन-वत्सरविजयदशम्यां समापिततपश्चर्यानियमः प्रस्थाय तस्मान्नगराद्विचित-पम्पासरोवरनिमज्जनः सेवितकोदण्डधरो नमस्कृतविरूपाक्षः भोजितशङ्कर-भारतीयतिवरः परिशीलितमाल्यवद्गिरिनिलयरामचन्द्रचरणयुगलीसेवनो यथाक्रमं निर्वर्तितकुमारसेवादिविविधपुण्यचर्यो यथापुरं प्रविश्यनेङ्गुदीं पुरीं निर्गत्य निजपुराभिमुखं समन्ताच्च सज्जीभवद्वाजिघीङ्कारपादातहुङ्कारबाणा-

In Public domain. Digitization Muthulakshmi Research Academy

सत्यङ्कारभेर्यग्रभाङ्कारतालालिझाङ्कारशातत्वढाङ्कारमातङ्गभीङ्कारढक्कापटात्कार नादैर्विदीर्णासु दिक्षु प्रतिक्षिप्तकौक्षेयकेषु प्रचण्डेष्वखण्डेषु योधेष्वबाधेषु दीपेषु जाग्रस्त्वरूपेषु अतुल्येषु भल्लेषु फुल्लेषु सर्वत्र कल्यैश्च निर्लक्ष्यमुल्लोलकल्लोल-मुत्काल्यमानेषु समर्दहानाय वेषव्रजैस्तत्र तत्राथ विरचितनीरानृसिंह-सन्दर्शोनोत्सवः समारुह्य हूणविरचितधूमशकटमतिमनोजवं दिनाभ्यां द्वाभ्यां सम्प्राप्य नासिकां प्रवर्तितत्र्यम्बकेश्वरमहारथोत्वः प्रविश्य विञ्चूरपुरं सुखेन साम्राज्यमनुभवन्विजयते तराम्।।3।।

पद्यम् -

नीरानृसिंहकरुणाभारारघुनाथभूपतेर्नित्यम्।
साम्राज्यायुस्तनुभवसम्पत्तिः सुचिरमेधिषीष्ट भुवि।।21।।

आनेङ्गुदिक्षितीन्द्रात्तिरुमलनृपतेः प्राप्तसन्मानवृत्तिः
श्रीमच्छीसज्जयार्याभिधगुरुणा प्राप्तविद्याविलासः।
कृष्णां गोदावरीसंवलयितवनपर्त्याख्यपुण्याग्रगण्य-
श्रीमद्रामेश्वाख्यक्षितिपतितिलकास्थानकव्यग्रगण्यः।।22 ।।

तत्ताद्दक्षात्मकरू(पो)त्तमपुरवसतेर्मुक्कराख्यान्वयेन्दोः
श्रीसीतारामभूमीपतिमकुटमणेस्ताद्दशास्थानभागे।
सन्धीभूतैः कवीन्द्रैः समदकविघटागण्डभीरूढनाम्ना-
हूतः श्रीशैलताताभिधकृतितनुजो नूलदुर्गात्तवासः।।23 ।।

कविसार्वभौमबिरुदाकलितः श्रीवेङ्कटार्यसहजातः।
रघुनाथविजयमेनं व्यतनोद्दिनमेकमेव कृष्णाख्यः।।24 ।।

In Public domain. Digitization Muthulakshmi Research Academy

गिरिकरिगिरिविधुसम्मितिभाजि श्रीशालिवाहनस्य शके।

क्रोधनमर्षाश्विनसितदशमे रघुनाथविजय एष कृतः।।25 ।।

कविवाक्यम्।

यत्कविना कर्तव्यं तदिह त्वत्कीर्तिभूषणं रचितम्।

रघुनाथविभो कविवरविभूषणं तु त्वदायत्तम्।।26 ।।

इति कविकृष्णविरचिताया रघुनाथविजयचम्प्वा पञ्चमो विलासः

अधिकत्रिंशश्लोका गद्यं त्वेकं विलासके प्रथमे।

द्वैतीयिके च गद्यत्रितयं चैकोनविंशतिः श्लोकाः।।1 ।।

गद्यान्यत्र तृतीये चत्वारि श्लोककाश्चतुस्त्रिंशत्।

गद्ये द्वे चैकोनत्रिंशश्श्लोकास्तथा तुर्ये।।2 ।।

गद्यत्रितयं श्लोकाः षड्विंशतिरत्र पञ्चमे कथितम्।

नवदुर्गकृष्णकविना जवेन रघुनाथविजयेऽस्मिन्।।3 ।।

इति

श्रीशैलकुलतिलकवेङ्कटार्यवर्यपौत्रनवीनदुर्गपुरस्थिततातार्यवर्यविद्वच्चूडामणि-
द्वितीयतनूभुवः कृष्णकविसार्वभौमस्य कृतिषु रघुनाथविजयाख्यचम्पूप्रबन्धः
समाप्तः।।

****** इति शम् *******

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

रघुनाथविजयचम्पूप्रबन्धस्य नायकः रघुनाथविंचूरकरः

In Public domain. Digitization Muthulakshmi Research Academy

Shrimant Raghoonathrao Vithalrao Vinchookar. C.S.I. The late chief of Vinchoor.

संस्कृत अकादमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

978-93-80171-68-5